१३
11(B)+(C)
B+C

93
11(B)+(C)
B+C

ग्रन्थनाम:-	"श्रीरामोत्तरतापिनीयोपनिषत्"
व्याख्यानाम	"आनन्दनिधिः" Ananda Nidhi
व्याख्यातृनाम:-	"आनन्दवनः" Anandavanaha.
विषयः-	अद्वैतवेदान्तम्, Advytam.

Shriramutaratapiniyopanishad.

904, 905

पू.ता. श्रीरामचंद्रायनमः मातृवद्दयावती श्रीरामतापनीयोपनिषन्मध्यमोत्तमाधि
१ कारिताश्चतेभ्यात्मसगुणोनिर्गुणोपासनप्रकाशपूर्वोत्तरभागाभ्यांप्रवर्त्तते तत्रमे
दाधिकाधिकारिभिः सगुणोपासनयैव निर्गुणास्योपपत्वात्पंचभिःश्लोकैरा
दौसगुणपरतयारामनाम्नोनिरुक्तिंकृत्वाषष्ठश्लोकेननिर्गुणपरतयानिरुक्ति
माह चिन्मयइत्यादिना चिन्मयेस्मिन्महाविष्णौजातेदशरथेहरौ रघोःकु
लेखिलंरातिराजतेयोहिस्थितः १ सरामइतिलोकेषुविद्वद्भिःप्रकटीकृतः
अत्रायमन्वयः रघोःकुलेदशरथविषये चिन्मयेस्मिन्महाविष्णौहरौजातेस
तीति विशेषिकादिमतेनिराकृतं अस्मिन्नुत्पन्नइत्यर्थः अयमहमस्मीतिप राम १

म२

मराणामप्यन्तभावात् वेवेष्टीति विष्णुः विष्लृव्याप्तौ इत्यस्य धातोः क्नुप्रत्ययांतस्य रूपं
सर्वमूर्त्तसंयोगित्वं व्यापकत्वं गगनादावपीति तद्व्यावृत्त्यर्थं महाविष्णोर्विष्णुक्तौ तथा भा २
च परिच्छेदत्रयशून्यत्वं महाविष्णुशब्दार्थः आत्मानः सर्वत्र सत्त्वान्न देशतः परिच्छेदः
सर्वदैव सत्त्वान्न कालतः परिच्छेदः तद्व्यतिरेकिणो वस्त्वंतराभावान्न वस्तुतः परिच्छेदः
हरोऽविद्यातत्कार्यहारिणी जांतिभक्तानामनुग्रहार्थं स्वकृतलीलावतारे इत्यर्थः
रामनामनिरुक्तिमाह अखिलं रातीति इत्यादिना अत्र रामनाम्नो द्वे निरुक्ती अत्र त्रिमते
एकारांतात्यर्थक शब्दात् महीस्थित इत्यर्थके मकारे योजिते सति रामो भवति अपरा
राजत इत्यर्थक रा शब्दात् महीस्थित इत्यर्थक मकारे योजिते सति रामो भवतीति अत्रे

गा
२

पाक्षरयोजना योहरिःरातिददातित्र्यखिलंभक्तानामिष्टंमहीस्थितःसन्नुतश्चायो
हरिःराजतेमहीस्थितःसन्सविद्वद्भिर्लोकैस्तुरामर तीतिप्रकरीकृतइतिपूर्ववन्नामव
धः अक्षरसाम्यादिदंनिरुक्तिद्वयंप्रकारांतरेणरामनामनिरुक्तिमाह रात्तसमाप्तेन
मरणंयातिस्फोटकैर्नतः यद्वा रामनामसुविख्यातमभिरामेणवा पुनः २ येनहत्वा
नारात्तसाःस्फोटकैःस्वस्पर्शकाद्यतिक्रमहेतुभूतादिभिक्तान्मरणंयातिभग
वतामारितातइत्यर्थः रात्तसार्थकराशब्दान्मरणंयातीत्यर्थकेमकारेयोजितेसती
यंनिरुक्तिः रामनामनिरुक्त्यंतरमाह रामनामेति अभिरामेणसुंदरेणवपुषा राम
वातस्यरामनामभुविइत्युपलक्षणंलोकत्रयेख्यातमित्यन्वयः। तथाचपुष्परामः २

स्वंदरइतिरामशब्दार्थः निरुक्तंतरमाह राक्षसान्मर्त्यरूपेणराहुर्मनसिजंयथा प्रभा
हीनांस्तथाकृत्वाराज्याहीणांमहीभृतां ३ धर्म्ममार्गंचरित्रेणज्ञानमार्गंचनामतः तथा
ध्यानेनवैराग्यमैश्वर्यंयस्यपूजनात ४ तथारामस्यरामाख्याभुविस्यादथतत्वतः ५
राहुर्ग्रहणकाले मनसिजंचंद्रंयथाप्रभाहीनंकरोतितथाराक्षसानुरावणादीन्मर्त्य
रूपेणप्रभाहीनान्कृत्वाराज्याहीणांमहीभृतांसूर्यसोमवंश्यानांराज्ञांचरित्रेणधर्ममा
र्गंनामतःज्ञानमार्गंध्यानेनवैराग्यंपूजनादैश्वर्यंरातिददातिभगवानितिकारणात
अस्यराघवस्यभुविरामाख्यास्यादित्यन्वयः राजतेःकर्त्तरिमप्रत्ययश्चौणादिकः अत्र
राकारमकाराभ्यांद्वावर्थौः राहुर्मनसिजंयथेत्येकः राक्षसान्मर्त्यरूपेणेतिद्वितीयः

ता॰ ३ राघ्रभातयाहीनानृइतितृतीयोर्थः रारीक्षाविवितिधातुसूत्रात्मकारस्कलपः स्मृतइत्य
भिधानाच्च चतुर्थंस्कराज्याहीणांमहीभृतामिति चरित्रादिनाकथंराज्ञांधर्माद्रिसिद्धि
रितिचेत् उच्यते चरितंनामसदाचारःसवधर्महेतुः श्रीरामस्याचारंदृष्ट्वाराजानोपित
थाचरंति परमात्मपरराममनाम्नोऽनवरतमर्थात्तु संधानेनतेषांज्ञानं श्रीरामध्यानेनप
रमानंदानुभावात्तेषांविषयेभ्योवैराग्यं वैभववागमोक्तश्रीरामपूजनात्तेषांऐश्वर्यमिति
प्रकारांतरेणारामनामनिरुक्तिमाह अथतत्वतइति तेषामग्निविष्णुशिवादीनांभावस्व
त्वतस्माद्राममइत्यन्वयः रकारोग्निःअइतिविष्णुःमःशिवःएतत्त्रयरूपत्वेनरकाराकार
मकारदेवतात्मकत्वमस्यात्तंभवति यद्वाउक्तानिरुक्तीरूपसंहरति अथतत्वतइतिय राम ३

निरुक्तिप्रकारं निदर्शयति। रमंत इति। चित्तवृत्तिनिरोधो योगः स येषामस्तीति योगिनः अस्मिन्रमंते क्रीडंते इति x५

स्मादेवं अथ तस्मात्तत्वतो रामाख्यात्स्यादित्यर्थः यद्वा शब्दार्थौ द्विविधौ वाच्यो लक्ष्यश्चे
ति तत्र वाच्यपदेन रामनाम निरुक्तिरिदमुक्ता लक्ष्यपरत्वेनाप्याह अथ तत्वत इति
अथ पक्षांतरे तत्वतः परमार्थतः रमंते योगिनोऽनंते सत्यानंदे चिदात्मनि इति राम
पदेनासौ परं ब्रह्माभिधीयते इति वक्ष्यमाणप्रकारेणायं निरुक्तः रामपदेनेनासौ दा
शरथिः परं ब्रह्म परमात्मैवाभिधीयते इति शब्दपराद्दृष्टं निरुक्तार्थः इष्टार्थसंयोग
जा क्रीडा रतिः कीदृश्यस्मिन्ननंते त्रिविधपरिच्छेदशून्ये नह्यस्य प्रदीपवत्वस्तुतः
तदतिरिक्तवस्तुनामभावात् ननु ब्रह्मणोऽनंतदृश्यत्वेन विनाशानुमानात् न त्वाका

देशतः परिच्छेदः। सार्वत्रिकत्वात्। नापि विद्युत इव कालतः। सर्वदा सत्वात्। नापि स्थलजलादिवत् x२

पू॰ता॰ शवत्सर्वगतश्च नित्या इति श्रुत्या विनाशित्वानुमानस्य बाधितत्वात् दृश्यत्वं च
४ ब्रह्मण्यसिद्धं अत्रायं पुरुषः स्वयंज्योतिरिति श्रुतेः ननु ब्रह्मणि रमणं न पु
रुषार्थः सुखलेशाभिन्नदुःखनिवृत्तित्वाभावादित्यत आह आनंदेति यथा ब्रह्म
ण आनंदरूपत्वात्तस्मिन् रमणं आनंदावाप्तिरूपतया पुरुषार्थ एवेति भावः न
नु ज्ञानवदानंदोप्यात्मगुणः स्यादित्याशंक्याह चिदात्मनीति सत्यं ज्ञानमनं
तं ब्रह्मेति श्रुतेः ज्ञानस्यात्मरूपत्वात्तदुक्तानुमानं दृष्टान्तासिद्धमिति भावः राम
ननु किमयं परमात्मा जीवात्मनः सकाशाद्भिन्न इत्याशंक्याह आत्मनीति आत्म ४

भूतएवनत्वजीवाद्भिन्नइत्यर्थः ननुसंसारित्वासंसारित्वादिविरुद्धधर्मा
क्रांतत्वान्नयोर्भेदःमैवंविंवप्रतिविंववदैक्योपपत्तेः क्वचित्सत्यानंदेतिपा
ठः तत्रसत्यमवाध्यमित्यर्थः नन्वेतेसत्यादयःशब्दाकिमेकमर्थमभिदत्यने
कंवा नाद्यएतेषांपर्यायत्वापत्तेपर्यायत्वेनसहप्रयोगानुपपत्तेः नद्वि
तीयः विकल्पासहत्वातकिंचपरस्परासंबधानेनकार्थानभिदध्युःसंवद्धा
न्वाजरद्गवादिवाक्यवदनुपादेयत्वापत्तेः द्वितीयेपिकिमेकमेवविशिष्ट
मनेकंवानाद्यःअखंडैकरसेब्रह्मणिवैशिष्ट्यानंगीकारात नद्वितीयःवा

ता॰पु ५

क्यभेदापत्तेः अत्रोच्यते सत्यादयः शब्दा एकमेवार्थमभिदधते नत्वेकार्थ
त्वेपर्यायत्वापत्तेःमेवं सत्यादिपदेषु लक्ष्यार्थस्यैकत्वेपि वाच्यार्थानां भि
न्नत्वात् तथा च यथा प्रकृष्टप्रकाशश्चंद्र इत्यत्र प्रकृष्टप्रकाशपदयोश्चंद्रस्व
रूपैकार्थलक्षणयोरपि यथा प्रकर्षप्रकाशत्वाख्यावाच्यार्थभेदादपर्यायत्व
मेवं प्रकृतेपि अर्थः। तस्य गुणावत्वमुपासकानुग्रहार्थमित्याह चिन्मयऽ
स्याद्वितीयस्य निष्कलस्याऽशरीरिणः उपासकानां कार्यार्थं ब्रह्मणो रूपक
ल्पना ७ चिन्मयस्य चिदेकरसस्याद्वितीयस्य सजातीयविजाती॥ छ॥

राम ५

यस्य गतभेदस्य शून्यस्य निष्कलस्य वस्तुतो मायाशून्यस्यात एव वस्तुतोऽशरीरिणो
रामस्य चतुर्भुजादिरूपकल्पना उपासकानां कार्यार्थमित्यन्वयः उपासका
नां सगुणोपासकानां अन्तःकरणशुद्धिमुत्पाद्य सगुणप्राप्तिःलक्षणं यत्का
र्यं तदर्थमित्यर्थः यद्वा निष्कामानां सगुणनिष्ठाद्वारा निर्गुणप्राप्तिलक्षणं
यत्कार्यं तदर्थमित्यर्थः स्वादिरत्नवत्पूर्णमयत्वादेव तत्संयोगपृथक्त्वमुपप
न्नं तथा चोक्तं जैमिनिः एकस्य तूभयत्वे संयोगपृथक्त्वमिति सामान्येनोक्तं विशे
षतो दर्शयति रूपस्थानां देवतानां पुंस्त्र्यंगास्त्रादिकल्पना द्विचत्वारिषड्

ता॰ ष्टासांदशद्वादशषोडश २ अष्टादशामीकथिताहस्ताः शंखादिभिर्युताः सह
स्रांतास्तथातासांवर्णवाहनकल्पना ९ रूपंसगुणंब्रह्मस्वरूपंतत्रस्थानांवि
ष्वादिदेवतानांपुंस्त्रीगौर्यादिकल्पनाशास्त्रप्रसिद्धेतिशेषः पुंमांसोविष्वा
दयः स्त्रियोलक्ष्म्यादयः अंगानिहृदयादीनि अस्त्राणिचक्रादीनि आदि
पद्मावरणादेवताः कल्पनांतरमपिदर्शयति द्विचत्वारीति आसांदेवतानां
द्विचत्वारिषडष्टतथादशद्वादशषोडशाष्टादशहस्तांताः शंखादिभिर्युक्ता राम
अमीहस्ताः शास्त्रविद्भिः कथिताइत्यन्वयः एवंवायुधोपेतहस्तकल्पनेय ६

मेका अथद्वितीयतृतीयकल्पनामाह तथातासामितितथातेनप्रकारेणातासांवा
णीवाहनकल्पनातृतीयत्यर्थः एवंशुक्लादिवर्णकल्पनाद्वितीया गरुडादिवा
हनकल्पनातृतीयेत्यर्थः चतुर्थपंचमकल्पनामाह शक्तिसेनाकल्पनाचब्रह्मणोपि
बहिःपंचधा कल्पितस्यशरीरस्यतस्यसेनादिकल्पना १० शक्तिशेनादिकल्पना
चशास्त्रविद्भिःकथितेत्यर्थः एवंविमलादिशक्तिकल्पनाचतुर्थी विष्वक्सेन
प्रमुखसेनाकल्पनापंचमीत्यर्थः इमांपंचविधकल्पनामुपसंहरति ब्रह्मणो
ति एवंविष्ण्वादिसाधारणदेवताकल्पनादर्शिता अथप्रकृतस्यब्रह्मणएवो
पासनापयोगिनीकल्पनांउत्तरार्धेनाह कल्पितस्येति तस्यश्रीरामस्ययत्कल्पि

ता॰
७

गंलीलयाविष्कृतंशरीरंचतुर्भुजादियुक्तंतस्योपासनादिकल्पनाशास्त्रविद्भिरुक्तेत्य
न्वयः आदिपदाद्वर्णादिकल्पनेत्यर्थः ननूपासनेनस्वरूपकल्पनामात्रेणासिद्ध
तिकिंत्वमंत्राद्युष्ठानेनेत्यंतोमंत्रांतरापेक्षयोत्कर्षवद्दर्शनेवमंत्रराजजपेविधत्ते ब्रह्मा
दीनांवाचकोयंमंत्रोन्वर्थादिसंज्ञकः जप्तव्योमंत्रिणानैवविनादेवःप्रसीदति ११
अयंवक्ष्यमाणषडक्षरोमंत्रः अन्वर्थादिसंज्ञकइत्यन्वयः वाचकत्वतयासर्वानर्थान
नुगता[illegible]दिःश्रेष्ठासंज्ञारामनामरूपायस्मिन्सोन्वर्थादिसंज्ञकः शेषाद्विभाषेति
बहुव्रीहौकप्प्रत्ययःसहस्रनामतत्तुल्यरामवाचकत्वात्सर्ववाचकत्वाद्वायंसर्वश्रेष्ठ
इतिसर्ववाचकत्वंविष्टणोति ब्रह्मादीनामिति अतश्चास्योपासनेनब्रह्मादयोप्युपासि राम ७

नाम२

नाभवेयुरितिभावः जप्तव्यइति अतोयंमंत्रिणागुरुतोगृहीतमंत्रेणावश्यंजप्तव्यइति
अपूर्व्वविधिः विहितस्यास्यजपस्यविघ्नबाधकप्रदर्शनेनावश्यकर्त्तव्यतांद्रढयति
नैनेनविनेति एवंराममंत्रजपंविनादेवोध्यानेनात्मकोरामोनप्रसीदति सविलासावि
द्याख्यमलापाकरणेनस्वाभिन्नतयाप्रकाशतइत्यर्थः ननूपासनेक्रियादिभेदांगी
कृतोत्रद्वैतभंगप्रसंगः तदनंगीकृतौचतत्कर्म्मोपासनस्यासिद्धिरित्याशंकाह क्रिया
कर्म्मेज्यकर्तृणामर्थंमंत्रोवदत्यथ मननात्त्राणनान्मंत्रःसर्व्ववाच्यस्यवाचकः १२
क्रियाकर्मेज्यकर्तृणामितिक्रियामंत्रोपासनंकर्म्मतत्फलंगच्छन्तेहोमादिइज्यायज
नीयोभगवान्रामःकर्त्तोपासकः एतेषामर्थंनिवृत्तिंमिथोभेदनिवृत्तिरूपांस्वयं

ता· ८ मंत्रोवदति सर्वात्म करामपदस्यास्यमंत्रस्यप्रपंचभेद निवृत्तिनांतरीयत्वात अर्थो
भिधेपरैवक्ष्यप्रयोजननिवृत्तिषुइतिकोशकारः क्रियादिभेदाभावेपिव्यावहारि
कभेदमाश्रित्योपासनसिद्धिरितिभावः ८ अथमंत्रशब्दस्यनिरुक्तिंदर्शयन्निवब्रह्मा
दीनांवाचकोयमित्यत्रस्यष्टमुक्तं सर्ववाचकत्वंदर्शयति अथमननादित्यादिना
अथगुरूपदेशानंतरंतत्वस्यानुचिंतनं तस्मात्त्राणनंउपासकस्यसंसारतोरक्षण
करणान्मंत्रइत्यर्थः अन्यथात्राणनादित्येवब्रूयात कीदृशोयंमंत्रः सर्ववाच्य
स्यवाचकः ब्रह्मादिभेदप्रपंचस्यश्रीरामाद्भिन्नतयानिरूपयितुमशक्यत्वात्सर्वा
भिधायकइत्यर्थः वाह्यपूजोपयोगियंत्रंश्रीरामशरीरमेवेत्याह सोभयस्येतिय राम ८

स्यास्य विग्रहो यंत्रकल्पना विनायंत्रेण चेत्पूजा देवता न प्रसीदति १२ यंत्रकल्पना
कल्प्यमानं यंत्रं वक्ष्यमाणं यंत्रं अस्य देवस्य रामस्य विग्रहः शरीरमेव कीदृशस्य देवस्यो
भयस्याभयेन वाच्यब्रह्मादिप्रपंचेन वाचकेन मंत्रराजेन विशिष्टस्येत्यर्थः ननु शंख
चक्राद्युपेतकल्पितवपुष्येव पूजास्तु किं यंत्रेणेत्यत आह विनायंत्रेणेति चे
द्यंत्रेण विना पूजा तदा देवता न प्रसीदति नात्मानं दर्शयतीत्यर्थः इति शब्दः प्रथमो
पनिषत्समाप्त्यर्थः इति प्रथमोपनिषत् अथ विधिप्सितमंत्रजपस्य मंत्रार्थानुसं
धानपूर्वकत्वाद्रांबीजप्रतिपाद्यं तत्पदलक्ष्यं स्वप्रकाशचैतन्यं तत्पदवाच्यं जगत्कारणं
ब्रह्म दर्शयति स्वभूर्ज्योतिर्मयोनंतरूपी स्वस्वेनैव भासते जीवत्वेनेदमोऽयस्य दृष्टिस्थि

ता· ९

तिलयस्य च २४ यद्वा स्वप्रकाशचैतन्यस्य व्यक्तो मायातीतस्यापि रामाख्यापरमा
त्मनस्त्रिगुणात्मकमायोपाधिवशाज्जगत्सृष्टिस्थितिलयहेतुत्वं दर्शयन्नेव रामाभिन्न
मंत्रराजावयवस्य रांबीजस्यार्थमिति स्वभूरिति स्वभूः स्वतःसिद्धो कारणाकः तथा ज्योति
र्ज्योतिर्मयः स्वार्थिकोमयट् अनंतं त्रिविधपरिच्छेदशून्यं रूपं यस्य सोनंतरूपी ज्यो
तिरूपस्यापि सूर्यादिवत् दृश्यत्वं स्यादित्यत आह स्वेनैवभासत इति घटादिज्ञाना
नंतरं ज्ञानविषयकसंशयादर्शनात् घटादिज्ञानानां स्वप्रकाशत्वमिति भावः किंवा
त्मा स्वप्रकाशः कृत्स्नजडप्रकाशकत्वात् इति केवलव्यतिरेक्यनुमानमाह जीवत्वे
नेदंमायस्येति यस्य परमात्मनो जीवत्वे कृत्स्नजडस्फोरकत्वेन श्रीमात्मकं का राम ९

रप्रभवंइदंकृत्स्नजगद्भासतइतिक्रियापदंपूर्वपरादनुवर्त्तनीयं तथाचकृत्स्नजड
प्रकाशकत्वान्नत्वप्रकाशमन्यथाजगदांध्यप्रसंगइतिभावः ओंकारप्रभवंसर्वंत्रै
लोक्यसचराचरंइतिपरंॐकारोजगत्कारणं ननुस्वप्रकाशचिदात्मनएककथंजग
त्सृष्ट्यादिहेतुत्वमित्याशंक्यमायागुणोरूपलक्षितयाचिच्छक्त्यातदुपपादयिष्य
ति सृष्टिस्थितिलयस्यचेत्यग्रिमश्लोकेन कारणत्वेनचिच्छक्त्यारजःसत्वतमोगु
णैः यथैववटवीजस्थःप्राकृतश्चमहाद्रुमः १५ रजःसत्वतमोगुणोरूपलक्षितया
चिच्छक्त्यासृष्टिस्थितिलयस्यकारणत्वेरामोवतिष्ठतइतित्रियापदमध्याहृत्यान्वयः
स्वप्नतत्वस्थलस्यार्थःस्वच्छज्योतिर्मयइत्यादिनोक्तःतस्यस्वाच्छोर्थस्तुजगत्कारण

ता॰ ख्यो जीवत्वेनेत्यादिनोक्तः एवमक्षरद्वयं रामाख्यं ब्रह्मरां बीजार्थ इति विवक्षितोर्थः
१० एवं प्रतिपाद्यप्रतिपादकयोरभेदादागतं जगदाधारत्वं रां बीजे पर्यवसन्नं तदेतत्स
दृष्टान्तं कंठतः प्रतिपादयति यथैवेत्यादिना सोऽनन्तरश्लोकार्धेन यथैव प्राकृतो महा
द्रुमो बहुफलशाखापत्रप्ररोहान्वितः सूक्ष्मो वटबीजस्थः स्यात्तथैव तद्वच्चराचरं जगद्राम
बीजस्थमित्यर्थः चकारोऽश्वत्थादीनां स्वस्वबीजस्थत्वदृष्टान्तानां समुच्चयः रामा
भिन्नं रामबीजं जगदुपादानं जगदाधारमिति फलितार्थः तथैव रामबीजस्थं जगदे
तच्चराचरं अथ रामबीजमुद्धरति रेफारूढा मूर्तयः स्युः शक्तयस्तिस्र एव चेति १६
रेफः रवर्णः तमारूढास्तदुपश्लिष्टा मूर्तयो ब्रह्मविष्णुरुद्ररूपा वर्णास्तिस्रः अकार राम १०

द्वयं मकारश्चेति समुदिता वीजं स्फवीजमित्यध्याहर्त्तव्यं प्रथमअकारो ब्रह्मरूपः द्वि
तीयउकारो विष्णुरूपः मकारो रुद्ररूप इति त्रिमूर्त्तिशब्देन वर्णा उच्यंते नन्वकारद्वय
मकाराणां सृष्ट्यादिशक्त्याभावे कथं ब्रह्माद्यात्मकत्वं इत्याशंक्याह शक्त्य इति सृष्ट्या
दिशक्तिमंत इत्यर्थः शक्तिशक्तिमंतोरभेदाच्छक्त्य इत्युक्तं ननु रेफस्य कथं स्वप्रकाश
चैतन्यपरत्वं युक्तं तस्याग्निवाचकतया प्रसिद्धत्वात् अत्रोच्यते रेफो ब्रह्मपरः विराड
ग्नित्रयोपलक्षितसकलत्रिगुणजगदुपस्थापकवर्णत्रयेण सामानाधिकरण्यात्
रकाराधिष्ठिता अकारस्य इति हि सामानाधिकरण्यं न चैवं रेफस्याग्निपरत्वं संभव
ति अग्नेर्ब्रह्माधिष्ठानत्वायोगादिभावः इति द्वितीयोपनिषत् प्रथमोपनिषद्विहित

ता॰ स्यमंत्रजपस्यमंत्रार्थज्ञानंविनावीर्यवत्वाभावात्त्रिपद राममंत्रस्यप्रथमपदंरांवीजरू
११ पं द्वितीयोपनिषदित्युक्तं अथद्वितीयतृतीयपदयोर्व्याख्यानार्थंतृतीयोपनि
षत्प्रवर्तते सीतारामौतन्मयावत्रपूर्ण्योजातान्याभ्यांभुवनानिद्विसप्त स्थितानिचप्र
हृतान्येषुततोरामोमानवोमाययाधात् १७ अत्रास्मिन्मंत्रराजेसीतारामौतन्मयो
वीजात्मकौपूर्ण्योजातयोपूजतिरत्रज्ञानार्थः धातूनामनेकार्थत्वात् नत्वर्चनार्थे
अर्चनायाअग्रेवक्ष्यमाणत्वात् ननुवीजस्यजगत्कारणस्याभेदःसीतारामयोर्जग
त्कारणत्वेकथंस्यादित्याशंक्य तयोरपिजगत्कारणत्वमाह जातान्याभ्यामितिभ्या राम
भ्यामितिपंचमीसप्तम्यर्थे वेदांतिमतेसीतासहायस्यपरमात्मनएवनिमित्तस्तस्यस ११

तोजगदुपादानत्वाभ्युपगमात् मायायाउपादानत्वाभ्युपगमात् तथाचानयोःसीता
रामयोःद्विसप्तभुवनानि अधस्तनानिसप्त उपरितनानिचसप्तेतिचतुर्दशभुवनानि
जातानि तथास्थितानिचापरंघत्हृतानिविनिष्टानीत्यन्वयार्थौ निमित्तोपादानयो
र्भेदद्योतनार्थंचशब्दः तेषुततइतिभुवनेषुसृष्टेषुततोनंतरंरामआत्मानमध्यात्प्रावि
शयदित्यर्थः तत्सृष्ट्वातदेवानुप्राविशदितिश्रुत्यंतरात् ननुजडप्रविष्टस्यजगत्प्रका
शकत्वंनस्यात्परंतःप्रविष्टदीपवदित्याशंक्याह मानवइतिमाप्रमातयानवःनूतन
अकुंठितप्रकाशशक्तिरित्यर्थः यद्वामाययामानवःकारणावतारइत्यर्थः अत्राप्ति
मातिप्रियशब्दोपस्थापितंसन्नासु~~र्निप्रत्वामामात्वं~~नमसात्मकात्वंरामस्याहइति॥२

ता
१२

स्फूर्त्यानंदरूपेराशब्दार्थः रूपनामनीमा शब्दार्थः इत्यभिमतं तथाच स्वानुप्रवेशेनासतो
जडस्यापि जगतः सत्तास्फूर्त्तिप्रदत्वात्त्राणात्वं जगदात्मकात्वं रामशब्द इति विवक्षितेनैव नमः
शब्देन योजनामाह जगत्त्राणायात्मनेस्मै नमः स्यान्नमस्त्वैकांप्रवदेत्साकृपणेनेति
॥१८॥ अस्मै जगदात्मप्रवेशेन सत्तास्फूर्त्तिप्रदायात एव जगत्त्राणायात्मने नमः स्या
दित्यन्वयार्थौ नमः शब्दार्थमाह नमस्त्वैकांप्रवदेदिति नमः शब्दो जीवपरमात्मनोरै
कांप्रवदेदित्यन्वयः प्रह्वीभाववाचकनमः पदेन प्रह्वीभूतो जीवो लक्ष्यते ततस्त्वनी
वशब्दलक्षको नमः शब्दो रामपदसामान्याधिकरण्याज्जीवपरमात्मनोरैकात्वपर्य
वस्यति तत्त्वंपदवदिति भावः चतुर्थ्यास्त्वत्र पृथगर्थाभावेपि नमः परसन्निधावप

राम
१२

रिहार्थान्वमुपासाने यद्वा चतुर्थ्यर्थश्चतुर्थोपनिषद्विबोध्यः ननु विरुद्धधर्मवत्तोजीव
परमात्मनोः कथमैक्यमित्याशंक्यतत्रशब्दः पूर्वपक्षनिषेधार्थः पूर्वपक्षनिषेधेहे
तुमाह भागत्यागेनेति वाच्यांशोपाधिं विहायलक्षितेनभागेनात्स्वप्रकाशचिन्मात्र
स्वरूपेणोभयोरैक्यं रामपदस्य हृदन्तेन नमः पदस्य पदद्वयदिति संबंधः इतिशब्दस्तृतीयो
पनिषत्समाप्त्यर्थः इतितृतीयोपनिषत्समाप्ता विनायकेगांचसृज्जादेवतानमश्री
हि२ हृतीयपत्तिंप्रथमोपनिषदि तत्र कीदृशं यन्त्रस्वरूपमितिजिज्ञासायां तन्निरूपणार्थं
तुरीयोपनिषत्संप्रवर्त्तते तत्र प्रथमं श्रोतृबुद्धिसौकर्याय मन्त्रवाक्यार्थमाह जीववा
चिन्निमानामचात्मारामेतिगीयते तादात्म्यकायाचतुर्थीतयाचाष्टेतिकथ्यते १८

ता नमइतिनामजीववाचि रामेतिप्रातिपदिकेन चआत्मापरमात्मागीयतेकथ्यतेइत्य
र्थः आत्मपदमत्रपरमात्मपरं जीवस्यनमःपदार्थत्वात् अथरामायेत्यत्रवर्त्तमाना
याश्चतुर्थ्या अर्थमाह तादात्मिकेतुनैरार्थ्येन तथाचसतिनमोरामपदयोर्जीवप
रमात्मपरत्वेसतियाचतुर्थीआयेतिकथ्यते रामप्रातिपदिकात्पराउच्चार्यतेसा
तादात्मिकेत्यन्वयः सेत्यध्याहारः तादात्म्यंजीवब्रह्मणोरैक्यंबोधयतीतितादात्मि
केतिविग्रहः यद्यपिआयेतिनचतुर्थीतथापिचतुर्थीसंबंधिविकारत्वाच्चतुर्थीत्वमु
क्तं जीव वाचकनमःपदसन्निधानेतिद्विवचनादिकमपहायचतुर्थ्येकवचनेकं
ठत एकत्वबोधकमेवेतिभावः ननुनमोरामपदाभ्यांसमानाधिकृताभ्यांजीव राम १२

ब्रह्मणोरेकत्वंचेद्बोध्यतेतदाबीजस्यमंत्रे ऽनुप्रवेशेनकिंप्रयोजनं उच्यते शब्दरूपं
बीजमपिरामसामानाधिकरण्याद्रामाभेदप्रतिपादनपरमेव अतएवप्रागुक्तं सी
तारामौतन्मायाविति ननुजीवब्रह्मणोरेकत्वंयदिराममंत्रार्थः तदारामतन्मंत्रयोर्वा
च्यवाचकत्वसिद्धिर्व्याहन्येतेत्यतआह मंत्रोयंवाचकोरामोवाच्यस्याद्योगएतयोः
फलदश्चैवसर्वेषांसाधकानांनसंशयः अयंमंत्रोवाचकोरामश्चवाच्यइत्यन्वयः
जीवब्रह्मणोरेकत्वंतुरामात्मकमेवनततोभिन्नं अद्वैतव्याकोपात् तथाचैक्य
बोधकोपिरामबोधकएवेतिभावः ननुमंत्रमात्रमनुष्ठेयंकिंअर्थानुसंधानेन
अर्थमात्रंवानुसंधेयंकिंमंत्रानुष्ठानेनेत्यतआह स्याद्योगइति एतयोरर्थानुसंधा

ता· नमंत्रानुष्ठानयोर्योगः सर्वेषां साधकानां मोक्षफलदश्च शब्दात् कामि कामितभोग
दश्च एवं शब्दात्फलदो भवत्येवेत्यर्थः यद्यप्येकैकमात्रानुसंधाने पापक्षयादिफ
लकं तथापि तयोर्योग एव मोक्षफलदो नान्य इति भावः उक्तमर्थं दृढ ँति नशंस य३
य इति ननु वाचको मंत्रोपासनेनैव वाच्यो रामः साक्षात्कृतो भवति कथमाग्रहः लौ
किकश्लोकाद्युपनिबंधनेनापि रामसाक्षात्कारोपपत्तेरित्याशंक्याह यथा नामी
वाचकेन नाम्ना यो भिमुखो भवेत् तथा बीजात्मको मंत्रो मंत्रिणोऽभिमुखो भवे
त् २१ नामास्यास्तीति नामी संज्ञावान् योऽश्वदत्तादिः स यथा वाचकेन नाम्ना कीर्त्य
मानेन नाम्ना कीर्त्यमानो भिमुखो भवेत् विमुखोपि संमुखो भवति तथा बीजात्म राम १४

कोमंत्रएकाक्षरः यद्वावीजमात्मनिशरीरेयस्यसवीजात्मकः षडक्षरोमंत्रोमेत्रिणा
मंत्रप्रतिपाद्यस्यरामस्याभिमुखयतिश्रुतिश्रवणादिवोधयतीत्यभिमुखः सा
क्षात्कारहेतुर्भवेदित्यर्थः मंत्रिणाइतिकर्मणिषष्ठी अत्रयद्यपिकेवलोनदाष्टीति
केनद्रढयतितथापिश्रोतव्यःश्रुतिवाक्येभ्यइतिवचनप्रामाण्याच्छ्रुतिश्रवणादि
परिपाकएवसाक्षात्कारहेतुरितिभावः अथवक्ष्यमाणषडंगगतयावीजादिन्यास
माह वीजशक्तिंन्यसेद्दक्षवामयोःस्तनयोरपि कीलीमध्येविनाभाव्यःस्ववांछयावि
नियोगवान् २२ वीजमाद्यक्षरंशक्तिरंत्याक्षरंदक्षवामयोःस्तनयोरनुक्रमेणन्यसे
दित्यन्वयः कीलोमध्यगतमक्षरत्रयंमध्येस्तनयोरंतरालेन्यसनीयंइतिशेषः कीदृ

ता शः कीलः विना भाव्यः बीजशक्तिध्यांष्टयक्रुलेन भावनीयो ज्ञातव्यः अन्यथा कीलाप
रिज्ञाने सकीलो मंत्रः फलदो न स्यादित्यर्थः यद्वा अविनाभाव्य इत्यकारप्रश्लेषः अ
विना बीजशक्तिमध्यवर्त्तितया तत्संश्लिष्टत्वेन भाव्य उपासनीयः मंत्रस्य विनियोगमा
ह स्ववांछेति स्ववांछासिध्यर्थं जपे विनियोग इत्याकारेण प्रयोगोत्र कर्त्तव्य इत्यर्थः
बीजशक्तिकीलन्यासः सर्वमंत्रेषु साधारण इत्याह सर्वेषामेवेति सर्वेषामेव मंत्राणा
मेष साधारणः क्रमः अत्र रामोनंतरूपश्च जमावह्निनासमः २३ एष क्रमे बीजादि
न्यासकल्पनाप्रकारः सर्वेषामेव मंत्राणां साधारणः समान इत्यर्थः पूजांगयंत्र
नीरूपयितुं पूजनीयस्य रामस्य रूपपरिवारस्फूर्त्तिं चरित्रं सार्धचतुस्त्रिंशद्भिराह अ राम
१५

तेजसेति४

त्रेति अत्रजडात्मकेप्रपंचोरामः सीतयाप्रकृत्याभातीति द्वितीयतृतीययोरन्वयः अ
त्रदृष्टांतमाह चंद्रश्चंद्रिकयायथेति तद्वत्तस्यपरिच्छेदंवारयति अनंतरूपइति तस्य
अग्निस्वरूपत्वमाह तेजसेति अत्रसमशब्दस्याभेदवाचकत्वमेव तथावह्निनासमो
वह्न्यात्मकइत्यर्थः एतदेवोपपादयति तेजोरूपत्वेनेत्यर्थः अथास्यसोमात्मकत्वमा
ह सत्वगुणविशिष्टश्चेदग्नीषोमात्मकंजगत उत्पन्नंसीतयाभातिचंद्रश्चंद्रिकयायथा
२५ तेजशब्दोवधारणे योवह्निरूपः सएवानुष्णगुरूपइत्यर्थः अनुष्णगुइत्यत्रछांदस
त्वाद्विभक्तिलोपः अनुष्णाशीताः गावः किरणाः यस्यसोनुष्णगुश्चंद्रात्मकइत्यर्थः
विश्वश्चेदिति विश्वरूपोरामश्चेदग्नीषोमात्मकस्तदातदुपपन्नंजगदग्नीषोमात्मकंभवि

ता·
२६

त्वमर्हतीति शेषः प्रकृत्या सहितः श्यामः पीतवासा जटाधरः द्विभुजः कुंडली रत्नमाली
धीरो धनुर्द्धरः २५ प्रकृत्या सीतया सहितो रामः कीदृशः श्यामः पीतांबरो जटाधरः भुजद्वयो
पेतः कुंडलवान् रत्नमालायुक्तः धीरो विकाररहितावथन्नद्धः धनुर्द्धरः धनूरूपलक्षितः भु
जयोरन्यत्र उपयोगस्य वक्ष्यमाणत्वात् प्रसन्नवदनो जिताष्टषट्कविभूषितः प्रकृत्या परमे ३४
श्वर्या जगद्धात्र्यांकितांकस्थत २६ सर्वदा प्रसन्नवदनः सर्वजिताष्टषट्केति प्रभृतयो
मंत्रिणो वक्ष्यमाणाः परिवारभूतास्तेषामष्टकेन विभूषितः पूर्वं प्रकृतिसाहित्यमात्रमुक्तं
संप्रति विशेषतस्तदाह प्रकृत्येति परमेश्वर्या परमेश्वरशक्तिरूपया जगद्धात्र्या प्रकृत्या सा
सीतयांकितश्चिह्नितो को वामांकस्तं विभर्तीति वामांकस्थत चिच्छक्तिरूपसीतालि राम
२६

गितत्वमाह हेमाभयाद्विभुजयासर्वालंकारयाचिता श्लिष्टःकमलधारिण्यापुष्टःकोस
लात्मजः २७ कीदृशोरामः कोसलाजायाः कौशल्यायाः आत्मजः तथा चित्ताचिद्रुपया
हेमाभयाद्विभुजयातथासर्वाणिअलंकृतानिभूषणानियस्याः तयासीतयाकमलधा
रिण्याश्लिष्टःवामभागेआलिंगितः पुष्टःसदालिंगनाद्देवआनंदत्वंदिलइत्यर्थः दक्षि
णलक्ष्मणेनांकितइत्याह दक्षिणेलक्ष्मणेनाथसधनुःपाणिनापुनः हेमाभेनानुजेने
वानुजेनचलक्ष्मणेनपुनःश्लिष्टःसंबद्धइत्यर्थः तंदेति यद्वा श्रीरामसीतालक्ष्मणाख्य
यानिर्दिष्टास्तदाश्रेयत्वेनकोणत्रयंत्रिकोणंभवेत् त्रिकोणस्यंयोन्याकारत्वाद्रामशरीर
भूतस्यास्यांतभागस्यजगत्कारणतासूचिताभवति लक्ष्मणस्यापिपृष्ठांगमेत्रोस्मीता
वत्तदाकोणत्रयंभवेत् ॥२८॥ अथापरेदक्षिणेभागेसधनुःपाणिर्यस्यतेनसधनुःपाणिनासुवर्णाभेणानु
जेनेन ४

ता. १७
ह्र तथैव तस्य मंत्रस्याचाग्न्याणुश्च स्वाहा ङे तया एवं त्रिकोणरूपं यस्यां तं देवा ये समायगुः २९
यथा रामस्य मंत्रस्तथैव तस्य लक्ष्मणस्य मंत्रोऽस्तीत्यन्वयः लक्ष्मणमंत्रमुद्धरति यश्चाणश्च
स्वाहा ङे तयेति अणशब्दो मंत्रवाचीयाणरूपो मंत्रो लक्ष्मणं संबोधिमस्वाहा ङे तया ज्ञातव्य इति शे
षः स्वशब्देन बीजनाम नीपरामृश्यते ङे इति चतुर्थ्येकवचनं अंतशब्दोऽत्र भावप्रधानः स
बीजनाम चतुर्थ्यंतत्वेन लक्ष्मणमंत्रो ज्ञातव्यः प्रथमश्चकारोऽनंमातृत्वसमुच्चयार्थः द्विती
यश्श्रीसीतायस्वाहेति जानकीमंत्रसमुच्चयार्थः एवं रामाद्यधिष्ठितं त्रिकोणमुपसंहर
ति एवमिति तं देवा इति तं त्रिकोणाधिष्ठातारं प्रकृत्याख्यासीताकालाख्यलक्ष्मणेन देवं राम
रामं ये रावणपीडिता देवा इंद्राद्यस्य शरणं समायगुः प्रापुरित्यर्थः स्तुत्यापि प्रभुः प्रसीदतीति १७
ग१

तिवाक्यमभिप्रेत्याह स्फूर्तिचक्रकुशध्वजग । तःपतिंकल्पतरोस्थितं कामरूपायरामा
यनमोमायामयायच ३० कल्पतरोस्थितं ततस्थः सिंहासनस्थंजगतःपतिंस्फूर्तिच
क्रकुशध्वजंशंखचक्रत्यर्थः हेस्वामिन्कामरूपायस्वेच्छारूपायमायामयायत्रिगुणात्मि
कप्रकृतिप्रचुराय यद्वा मायास्त्रिगुणात्मिकायाश्रामय । योगवद्धिध्यानकाय
रामायनमइतिअन्वयार्थः नमोवेदादिरूपाय ॐकारायनमोनमः रमाधराय
रामायश्रीरामायात्ममूर्तये ३१ वेदानामृगादीनामादिरूपायकारणात्मनेनि
श्वासरूपायेनाविर्भावकायेत्यर्थः तेननवेदानांपौरुषेयत्वव्याक्षेपः ॐकाराय
प्रणवस्वरूपायनमःरमासीतावामांकेध । रतितस्मैरमाध । राय रामायसर्वाभिरा

व१

ता भायश्रियंसीतांरमयतीतिश्रीरामायात्ममूर्त्तयेव्यापकमूर्त्तयइत्यर्थः जानकीदेह
भूषायरक्षोघ्नायशुभांगिने भद्रायरघुवीरायदशास्यांतकरूपिणे ३२ जानकी
सीतादेहभूषायस्यशरीरालंकारोयस्य।यद्वा जानकीदेहः सीताशरीरंभूषायस्य
तस्मैराक्षसहंत्रेसुंदरायभद्रायमंगलरूपायरघूणांमध्येवीरायरावणास्यांतकरू
पाय रामभद्रमहेष्वासरघुवीरनृपोत्तम भोदशास्यांतकास्माकंरक्षदेहिश्रियंच
ते ३३ त्वमीश्वर्यादाययायाथसंभ्रमात्श्वैरिमारणं कुर्वितिस्तुत्यदेवाद्यास्तेनसार्द्ध
सुखंस्थिताः ३४ युग्मंअभिरामाणिभद्राणिकल्याणानियस्मात महद्दिव्यंरक्षा
संशार्ङ्गंधनुर्यस्यरघुवीरनृपाउत्तमा येनदशास्यांतकेतिपुनर्विशेषणंदशास्यव राम
१८

धएवास्माकमाशास्यइतिद्योतनायअस्माकमितिकर्मणिषष्ठी अस्मानरक्षायव
णापद्रवात्त्राहीत्यर्थः तेइतितच्छब्दस्यस्त्रीलिंगस्यद्वितीयाद्विवचनंइदंउत्तरश्लोके
नसंवध्यते त्वमिति हेरामत्वमीश्वर्यासीतयाअथअपिचंतेद्वेरक्षाश्रियोरापया
सप्रतिवर्त्तमानेरावणोपद्रवकालेआशुःशीघ्रंअरेःशत्रोःरावणस्यमारणंकुरु अ
थस्तुतिफलमाह इतिस्तोत्रेपतिइतिशब्देनसहसमासमनिषेध्यल्पपुइतिस्तुतिंस्तु
रा.२ त्वादेवाद्याश्चादिदेवेनसिद्धचारणाकिन्नरादय: इतिस्तुतिंकृत्वातेनसार्धंध्यानविष
यीकृतेनंतिसुखंयथास्यात्तथास्थिता: स्तुवंत्येवंहिब्रह्माद्यस्सदारावणाच्चास्तर: रा
मपत्नीवनस्थायःस्त्वनिष्टन्यर्थमाह्वदे २५ एवंदेवादिवृत्त ऋषयोवसिष्ठाद्याश्चपिस्तु

वृ.ता. वंतिअक्षकवन्नित्यर्थः देवादिभिः क्षतोकृतायामपि गाढापराधं विना शिवभक्तरावणाव
१९ धस्यानौचित्यात गाढापराधकरणाय श्रीरामप्रेरितो रावणः सीतां जहारेति विवक्षन्नेव राव
णपदनिरुक्तिमाह तदा रावण इति तदेति विवक्षाति कालियोरावणेः अस्वरः एवास्वरः
राक्षसो रामपत्नीं वनस्थां स्वमृत्योघार्थे आरादेः गृहीतवान्सरावण इति ख्यात इत्युत्तर
श्लोके अत्र रामपत्नीमित्यर्थेका त राशब्दाद्वनस्थां नहारेत्यर्थे केवन शब्दे प्रयुक्ते
निरुक्तिरियं रावण इति निरुक्त्यंतरमाह सरावण इति ख्यातो यद्वा रावाद्रावणः
तद्याजेनेन्निंतुं सीतां रामो लक्ष्मण एव च २४ विचरंतस्तदा भूमौ देवीं संदृश्य वा स्वरं
हत्वा कबंधं शबरीं गत्वा तस्याज्ञया तदा २५ पूजिता वीरपुत्रेण भक्तेन च कपीश्वरं श्री राम १९

हूयशंसतांसर्वमाद्यंतंरामलक्ष्मणौ ॥ २७ त्रिभिःसंबंधः रावाज्ञगडोरनाद्धारावणाइ
त्यर्थः अथचरित्रमाह सार्धैकादशभिः तद्व्याजेनेति रामोलक्ष्मणएवसीतांखेदीई
क्षितं तदासीताहरणोत्तरकाले भूमौविचरेतुःएवकारःसहायांतरव्यवच्छेदार्थःचका
रोमिथःसमुच्चयार्थःतद्व्याजेनहृतसीतान्वेषणव्याजेनकवंधनामकमसुरंसदृशप
हत्वाचकवंधस्याज्ञयाभिमुख्येनविज्ञस्थशबरींगत्वातयाशबर्यापूजितोरामल
क्ष्मणोभक्तेनेईरयतीतिईरोवायुस्तस्यवायोःपुत्रेणहनूमताद्वारभूतेनचकपीना
मीश्वरंसुग्रीवमाहूयसर्ववृत्तांतमाद्यंतं आद्यंतावभिव्याप्यशंसतावुक्तवंतौछंदोह
सत्वादाभावः सतुरामेशंकितःसन्व्रतपार्श्वंवडुंडुभेः वियद्दर्शयामासयोराम

ता. २०

समचिक्षिपत ३८ स तु कपीश्वरो रामविषये शंकितः वालिवधलक्षणां महत्कार्यं क
र्तुमयं क्षमो न वेति संशयितः सन्प्रत्ययार्थं च वालिवधासामर्थ्यं श्रीरामेनिर्णीतं वालिव्य
तिरिक्तैरवध्यस्य डुंडुभेर्दैत्यस्य विग्रहं शरीरं वालिनिक्षिप्तं अस्थिकूटं अशेषपर्वत
प्रांशुं दर्शयामासेत्यर्थः यो राम इति यः सुग्रीवजिज्ञासितः स रामः सुडुंडुभिविग्रहं अचि
क्षिपत दशयोजनमिति शेषः अत्र चोरादिकत्वात्स्वार्थे णिच तथापि वालिसमए
वायं न तु ततोऽधिक इति सुग्रीवभ्रमनिरसनार्थं कृतमत्यद्भुतं कर्म दर्शयति सप्तताला
न्विभिद्याशु मोदते राघवस्य शरा तेन तुष्टः कपींद्रोऽसौ स रामस्य प्रपन्नतन ३९ आशुशी
घ्रं सप्ततालवृक्षान्विरुद्धदिक्स्थानेकप्राणान्विभिद्य राघवो मोदत इत्यर्थः छेदस्तिका राम २०

लानियमाङ्कितलरः तदाङ्कं अभिशरीरतालभेदिनरकालितेनाद्भुतकर्मणा तदृष्टः कपीन्द्रो
सोऽसुग्रीवोऽनुजः सरामसख्यमुपपन्नं किष्किन्धोपलक्षितं जगाम अग्रजं जेतुमिति शेषः श्लोकेना
न्वयः जगामाग्रजं हन्तुं जातो वालिना विगीतो गृहात् ॥ वालिनं तत्र निर्जगाम तं वालिनमथा गा२
हवे निहत्य राघवो राज्ये सुग्रीवं स्थापयेत्ततः ॥ ४० जगामाग्रजं हन्तुं ज इत्यादि त्रिभिः
संबंधः तदा वालिनो विगीतो गृहान्निर्जगाम अथ राघवः तं वालिनमाहवे निहत्य
सुग्रीवं राज्ये स्थापयेत् तत्र स्थापयदित्यर्थः छांदसत्वाल्लङर्थे लिङ् हरीनाहूय सुग्रीव सु२
स्त्वाह च आशाविदोऽधुना आशाय मैथिलीं मध्यदत्तास्तास्मागच्छतः ॥ ४१ सुग्रीवः कपिहरीवा
नरानाहूय आह च किं हे आशाविदः दिशां ज्ञातारो वानराः यूयं अधुना इदानीमेव
नी१

टी॰
२१

णाआशुआशुवेगातिशयबोधनायवीप्सा गच्छत्अद्यहिनेमैथिलीमादायआनीय
राघवस्यस्व ततस्ततारहनुमानब्धिंलंकांचसमाययौ सीतांदृष्ट्वाअसुरान्हत्वापुरंदग्ध्वा
तथाययौ ४२ ततस्तरंनंतरंहनुमानब्धिंततारलंकांचसमाययौ सीतांदृष्ट्वाअसुरान्राक्ष
सान्हत्वापुरंलंकांदग्ध्वातथास्वपरामेणासहागत्यसंबंधयाथातत्वतोयाथातथ्येन
रामायसर्वंन्यवेदयदित्यर्थः आगत्यरामेणासहन्यवेदयत्तत्वतः तदारामःक्रोधरू
पीतानाहूयाथवानरान् ४३ तदाहनुमतानिर्वेदेनोनरकालिकेधिनरावणादुर्वि
नयश्रवणाजनितेनविकृतंरूपंयस्यसरामःक्रोधरूपीअथतात्वानरानाहूयअस्त्रा
न्अस्त्राणिआदायतैःसार्धं लंकांसमाययौ तैःसार्धमादायपास्त्रांअपुरींलंकांसमा राम २१

ययौ तां दृष्ट्वा तद्धीशेन सार्द्धं युद्धमकारयत ४३ रामस्तां लंकां दृष्ट्वा तद्धीशेन लंका
धीशेन सार्द्धं युद्धमकारयत अकरोत स्वार्थेणाच घटश्रोत्रसहस्राक्षजिद्भ्यां युक्तं तमा
हवे हत्वा विभीषणं तत्र स्थाप्याथ जनकात्मजा ४५ घटश्रोत्रः कुंभकर्णः सहस्राक्ष
जितं इंद्रजित ताभ्यां युक्तं रावणमाहवे हत्वा विभीषणं तत्र स्थाप्य स्थापयित्वा ज
नकात्मजा सीतामादाय यां कस्थितो ज्ञात्वा तैर्विभीषणसुग्रीवादिभिः सहस्व पुरं ज
गाम आदाय यां कस्थितो ज्ञात्वा स्वपुरं तेर्जगाम सः ततः सिंहासनस्थः सन् द्विभुजो
रघुनंदनः ४६ ततो राज्याभिषेकानंतरं सिंहासनस्थः सन् द्विभुजो रघुनंदनः धनुर्ध
रो धनुरूपलक्षितो न तु हस्तस्थितचापः द्वयोर्भुजयोर्वक्ष्यं तरस्थाशास्य वक्ष्यमाणला

रः प्रसन्नात्मासर्वाभरणभूषितश्चासीदितिशेषः धनुर्धरःप्रसन्नात्मासर्वाभरणभूषि
तः शुद्धज्ञानमयींयामिवामितेजःप्रकाशनं ४७ कीदृशोरामः यामिदक्षिणभुजेज्ञान
मुद्रांधृत्वाकनिष्ठाद्यंगुलित्रयंप्रसार्य्यतद्दयाभिमुखंतर्जन्यंगुष्ठाग्रसंयोगोज्ञानमुद्रा
सामितेजः प्रकाशनंधृत्वाबलप्रकटनंधृत्वावामजानूमेउलंवामभुजयाबलेनापी
ड्यत्यर्थः व्याख्याननिरतश्चिन्मयःचित स्वरूपः परमेश्वरःब्रह्मादीनामपिनियंतेत्यर्थः
धृत्वाव्याख्याननिरतश्चिन्मयःपरमेश्वरः उदग्दक्षिणयोःस्वस्यशत्रुघ्नभरतोधृतः
४८ पुनःकीदृशोरामःस्वस्यउदग्दक्षिणयोर्भागयोःशत्रुघ्नभरतोधृतःधृतवान् अग्र
तःहनूमंतंचधृतवान्कर्तरिक्तिः हनूमंतंचश्रोतारमग्रतःस्थात्रिकोणकं भरताधस्तः

सुग्रीवं शत्रुघ्नाधो विभीषणं ४९ कीदृशं हनुमंतं श्रोतारं वक्ष्यमाणषट्कोणावयव
भूतमुपपादितं त्रिकोणमुपसंहरति स्यात्रिकोणकमिति षट्कोणावयवभूतं त्रिकोणं
तदं नीरूपयति भरताधस्तात्सुग्रीवं शत्रुघ्नाधो विभीषणमिति धृतवान् पश्चिम इति स्व
पश्चिमे लक्ष्मणं धृत्वा धृतवानित्यर्थः पश्चिमे लक्ष्मणं धृत्वा धृतछत्रं सचामरं तदधस्तौ ना
लंकांतकारौ च यं सं पुनर्भवेत ५० कीदृशं लक्ष्मणं धृतछत्रं सचामरं सुग्रीवविभीषणौ तच्च
जनहस्तावित्याह तदधस्ताविति तदधः तयोर्भरतःशत्रुघ्नयोरधस्तौ सुग्रीवविभीषणौ ता
लंकांतकारौ च जनहस्तौ धृतवानित्यर्थः द्वितीयं त्रिकोणमुपसंहरति श्री सं पुनर्भवेदिति
एवं त्रिकोणद्वयसंमिलनेन षट्कोणं भवेदिति पूर्वपरादनुवर्त्तनीयं अथ पूज्यस्य रामस्य

ता· पौर्वापर्येणांगाद्यावरणमाह एवं षट्कोणमाद्यैस्वदीर्घोगरेफसंयुतः एवं कर्णिकास्थि
२३ तोरामः षट्कोणेषु स्वरैर्वीजं तेन योजितदीर्घा आ ई ऊ ऐ औ अः इत्येवंरूपाः षट् तैर्युक्तानि
अंगानि हृदयादीनि षट् तैर्युक्तः पूज्य इति पंचमेनान्वयः अंगानां पूजास्थानक्रमः आग्नेय
नैऋत्यवायव्येशानकोणेषु हृदादिकवचांतं पुरतोनयने पूर्वादिचतुर्दिक्षु अस्त्रायफडि
ति द्वितीयंवासुदेवाद्यैराग्नेयादिषुसंयुतः ५१ त्रिभिः संबंधः अत्रयद्यपिवासुदेवाद्यावर
णं द्वितीयमुक्तं तथापिषट्कोणांतरे क्रियमाणाष्टदलमूल आग्नेयीमारभ्य आत्मने नमः
अंतरात्मने परमात्मने ज्ञानात्मने प्राचीमारभ्य निवृत्त्यै प्रतिष्ठायै विद्यायै शांत्यै इति
द्वितीयं बोध्यं अगस्त्यसंहितायां तथोक्तत्वात अत्र च यत् द्वितीयत्वमुक्तं तत्तु द्वितीयापे राम
२२

क्रियेति विशेषवंद्यं ततोष्टदलपत्रेषु आग्नेयीमारभ्य वासुदेवायनमः संकर्षणाय प्रद्यु
म्नाय अनिरुद्धाय प्राचीमारभ्य श्रीयै सरस्वत्यै प्रीत्यै रत्यै तृतीयावरणं वासुदेवा
द्यैः संयुतः एष आग्नेयादिषु पूजेत्यर्थः तृतीये वायुसूनुं च सुग्रीवं भरतं तथा विभीषणं
लक्ष्मणं चांगदं चारिमर्द्दनं ५२ द्वितीयाष्टदलपत्राग्रे वायुसूनुं सुग्रीवं भरतं वि
भीषणं लक्ष्मणं अंगदं शत्रुघ्नं जांबवंतं चतुर्थावरणं विन्यसेत त्रैः संयुतः एष पूज्य
इत्यर्थः ४ पंचमावरणमाह जांबवंतं च तैर्युक्तः ततो धृष्टिर्जयंतकः विजयश्च सुरा
ष्ट्रश्च राष्ट्रवर्धन एव च ५३ अकोपो धर्मपालश्च सुमंत्रस्तैभिरावृतः ततः सहस्रदृक्
वह्निर्धर्मरक्षो वरुणानिलः ५४ इंद्रेशधात्रनंतास्च दशभिस्तैभिरावृतः वहिस्तु रा

ता॰ २४ युधैः प्रभृत्यो नीलादिभिरलंकृतः ५५ द्वितीयाद्यष्टदले धृष्टिर्जयंतो विजयः सुराष्ट्रो राष्ट्र
वर्धनः अकोपो धर्मपालश्च सुमंत्रश्चेभिरावृतः एभिरावृतः पंचमावरणं प्रपूज्य इत्यर्थः
सप्तमावरणमाह बहिरिति षष्ठावरणाद्बहिः इन्द्राद्यायुधैर्वज्र शक्ति दंड खड्ग पाश ध्वज गदा
शूल पद्म चक्रै रिंद्रादिदिशायुधैः संयुतो रामः सप्तमावरणं प्रपूज्य इत्यर्थः बहिस्तद्वायुधैः प्र
ज्या नीलादिभिरलंकृतः वशिष्ठवामदेवादिमुनिभिः समुपासितः ५६ ततः षोडशदले
नील नल सुषेण मैंद द्विविद शरभ चंदन गवाक्ष किरीट कुंडल श्रीवत्स कौस्तुभ शं
ख चक्र गदा पद्म पद्मैरलंकृतो रामोऽष्टमावरणं प्रपूज्य इत्यर्थः नवमावरणमाह वसि
ष्ठवामदेवादिमुनिभिः समुपासितः द्वादशदले वसिष्ठ वामदेव जाबालिने गौतमाय भ राम
रद्वाजाय विश्वामित्राय वाल्मीकिने नारदाय सनकाय सनंदनाय सनातनाय सनत्कु २४

माराय समुपासितो रामो नवमावरणे पूज्य इत्यर्थः अथैवक्ष्यमाणयंत्रोद्धारानुरोधिनात्रध्रु
वाद्यावरणं दशममभिधत्ते तद्यथा द्वात्रिंशद्दले ध्रुवाय धराय सोमाय आपाय अनिलाय
अनलाय प्रत्यूषाय प्रभासाय इत्यष्टौ वसवः वीरभद्राय शंभवे गिरीशाय अजैकपदे
अहिर्बुध्न्याय पिनाकिने भुवनेशाय कपालिने दिक्पतये स्थाणवे भर्गाय इत्येकाद
श रुद्राः अरुणाय सूर्याय वेदांगाय भानवे इंद्राय रवये गभस्तये यमाय हिरण्यरेत
से दिवाकराय मित्राय विष्णवे नमः इति द्वादशादित्याः द्वात्रिंशन्नमे पत्रेष्वाताणभिध्रु
वादिभिर्युक्तो रामो दशमावरणे पूज्यः संप्रदायक्रमः अंगावरणं प्रथमं आत्माद्यावरणं
द्वितीयं वासुदेवावरणं तृतीयं हनुमदाद्यावरणं चतुर्थं धृष्ट्याद्यावरणं पंचमं वसि
ष्ठाद्यावरणं षष्ठं नीलाद्यावरणं सप्तमं ध्रुवाद्यावरणं अष्टमं द्वात्रिंशद्दलस्थेंद्राद्यावर

ता॰ णं नवमं ॥ प्रथमभूगृहस्थं वज्राद्यावरणं दशमं द्वितीयभूगृहे पूजायंत्रमुपसंहरति एव
मुद्देशतः प्रोक्तं निर्देशमस्य चाधुना ५५ त्रिरेखापुटमालिख्य मध्ये तारद्वयं लिखेत तन्म
ध्ये बीजमालिख्य तदधः साध्यमालिखेत ५६ द्वितीयांते च तस्योर्ध्वं षष्ठं ते साधकं तथा कु
रुद्वयं च तत्पार्श्वे लिखेद्धीमांतरे रमां ५७ तत्सर्वं प्रणवाभ्यां च वेष्टयेच्छुद्धबुद्धिमान् एवं
पूर्वोक्तप्रकारेण पूजायंत्रं संक्षेपतः प्रोक्तं अथ धारणायंत्रप्रकारं श्रुति जानीते निर्दिशइ
ति तस्य प्रसिद्धस्य धारणायंत्रस्य निर्देशोऽधुनोच्यते त्रिरेखेति त्रिरेखापुटं षट्कोणं पू
र्वोक्तरित्या आलिख्य मध्ये कर्णिकायां तारद्वयं लिखेत तन्मध्ये रतिं तस्याजस्योर्ध्वे उपरि वी२
भागे षष्ठीविभक्त्यंतं साधकं च लिखेत कुरुद्वयमिति तत्पार्श्वे बीजस्य पार्श्वयोः कुरुद्वयं
लिखेदित्यन्वयः बीजांतरे उदरे रमां श्रीबीजं लिखेत तत्सर्वमिति साध्यादिसहितं बीजं प्रण राम
× तन्मध्ये प्रणवद्वयमध्ये बीजं रां बीजमालिखेत् । तदधः बीजाधोभागे साध्यं साधनीयमर्थं द्वितीयाविभक्त्यंतमालिखेत् ३ २५

बाभ्यां परस्परसंमुखाभ्यां वेष्टयेत् सुद्धबुद्धिमान् दीर्घभाजिषडस्त्रेषु लिखेद्बीजं हृदादि
भिः ५८ कोणयोर्श्वरमामायतहृश्येनगमालिखेत् षडस्त्रेषु हृदयादिभिः हृदयशिरःशिखा
कवच नेत्रास्त्रैःसहितं बीजं लिखेत् कीदृशं बीजं दीर्घभाजि आकारादिषड्दीर्घयुक्तमि
त्यर्थः आग्नेयनैरृत्यवायव्येशानेषु हृदयादीनि पूर्वं नेत्रं अस्त्रं च पश्चिमतः एवं बीजमा
लिखेत् क्रोधं कोणाग्रांतरेषु लिखेन्मंत्रमितोगिरं ५९ वृत्तत्रयं साष्टपत्रसरोजे वि
लिखेत्स्वरान् क्रोधं कवचबीजं हुं कारं कोणाग्रांतरेषु कोणेषु यान्यग्राणि तेषामंतरेषु अ
भ्यंतरभागेषु लिखेत् लिखित्वा अमितः कोणानां समंततः गिरं वाग्बीजं लिखेत् वृत्तत्र
यमिति वर्तुलरेखात्रयं उपरिभागे अष्टपत्रेण सहितं साष्टपत्रं लिखित्वा तस्मिन्सरो
जे केशरस्थाने केसरवत्त्रैरंतर्येण षोडशस्वरान्विलिखेदित्यर्थः केसरइत्यमिमश्लोक

पू.ता. स्थितं संवक्ष्यते केसरेचाष्टपत्रेचवर्गाष्टकमथालिखेत् ६० तेषुमालामनोर्वर्णान्वि
२६ लिखेदूर्मिसंख्यया अष्टपत्रेअष्टानांपत्राणांमध्येवर्गाष्टके क च ट त प य श ल
वर्गाणामष्टकंअथालिखेत् तेषुमालेति तेषष्टस्वपत्रेषुमालामंत्रस्यवर्णमालास
प्तचत्वारिंशदक्षरस्यवर्णान्प्रतिपत्रंऊर्मिसंख्ययालिखेत् अंतेपंचाक्षरानेवंपुनरष्ट
दलंलिखेत् ६१ तेषुनारायणाष्टार्णांलिख्यतत्केसरेरमांअंतचामापत्रेपंचाक्षरावि
लिखेदिति पूर्ववर्णान्यथासंख्यंतत्केसरेद्वितीयाष्टपत्रंकेसरस्थानेरमांश्रीबीजंकेसरेष्व
ेवलिखेदित्यनुवर्तनीयं तद्बहिर्द्वादशदलंविलिखेद्द्वादशाक्षरं ६३ तथोनमोभगव
तेवासुदेवायइत्ययं द्वितीयाष्टदलाद्बहिर्द्वादशदलंलिखेत् तथातत्रद्वादशोक्तंलिखेत् राम
द्वादशाक्षरमुद्धरति ॐनमइति आदिक्षांतानूंकेसरेषुवृत्ताकारेणांसंलिखेत् ६४ तद्ब २६

ह्रिंः षोडशदलंलिखेत्तत्केसरे ह्रियं द्वादशदलकेसरेषु प्रतिपत्रे चतुःशंख्ययाआदितो
नानवर्णान्लिखेत अवशिष्टवर्णाङ्क्षियंमंत्रदलएवंवृत्तनाकारेणसंलिखेत तद्बहिरिति द्वाद
शदलाद्बहिः षोडशदलंलिख्यालिखित्वातत्केसरे षोडशदलेकेसरस्थाने ह्रियंह्रीं बीजंलि
खेदित्यनुकर्षः दलेषु षोडशान्नरलेखनमाह वर्मास्त्रनतिसंयुक्तं दलेषु द्वादशान्तरं द्
प तत्संधिषुश्रीरजादीनां मंत्रान्मंत्री समालिखेत वर्म हुंकारः अस्त्रं फट्कारः नति नमः
शब्दः एतै रत्नभागसंयुक्तं द्वादशान्तरं दलेषु षोडशपत्रेषु यथासंख्यमालिखेत तत्संधि
षिति तेषां षोडशदलानां संधिविभागेषु ईरजादीनां हनूमदादीनां मंत्रान् बीजरूपान्स
मालिखेत हनुमंत सुग्रीव भरत विभीषण लक्ष्मण अंगद शत्रुघ्न जांववंत इष्टष्टकावी
जानिदर्शयति त्वं स्वं ष्टं ष्वं लं ष्टं जं स्वं लिखेत्सम्यक्ततो वहिः ६५ द्वात्रिंशारंमहावज्रांना

दविंदुसमायुतं आद्यं वीजं हनुमतः द्वितीयं हयग्रीवस्य तृतीयं भरतस्य चतुर्थं विभी
षणस्य पंचमं लक्ष्मणस्य षष्ठं अरतिलक्ष्मणवीजानंतरं अंगरवीजं वोद्धव्यं। विभी
षणांवीजादत्वारि मर्हनमितिप्रायुक्तत्वात् ष्टंशत्रुघ्नवीजं न्नेजांववतोवीजं चक्रारात
क्षुक्ष्यारिमिंत्राणांवीजानामपिष्टहणानानिलिखितं नतोवहिर्हनूमरारिघाउशवीजैर्भा
वहिर्द्वात्रिंशारैर्द्वात्रिंशत्पत्रं महापद्मं नादविंदुसमायुतं सम्यकुस्यष्टतयाआलिखि
त महापद्मत्वं मंत्रराजलेखनयोग्यत्वात् नादः प्रणावस्य चतुर्थावयवः विंदुः पंचम
स्ताभ्यांसमायुक्तं नादेत्यादिस्थत्पयेनशक्यनगरमायुतमितिक्वचित्पाठः विलिख
न्मंत्रराजाणांस्तेषुपत्रेषु यत्नतः ६६ ध्यायेदष्टवसूनेकादशरुद्रांश्चतत्रवै द्वादशे
नांश्चधातारंवषट्कारंततोवहिः ६७ तेषुपत्रेषुमंत्रराजस्यद्वात्रिंशद्वर्णांविलिखेत् राम २७

तत्रैवैवपत्रेषुवस्वादीन्यंततोध्यायेत धृवोधरस्तथासोमश्चापोवायुस्तथानलः प्रत्यू
षश्चप्रभासश्चवसवोष्टौप्रकीर्त्तिताः वीरभद्रश्शंभुर्गिरिशोजैकपादहिर्बुध्न्यौ पिनाक
पराजितभुवनाधीशाः कपालीचदिक्पतिःस्थाणुःइत्येकादशरुद्राःपापघ्नीविद्य
५४ रणाद्धाः वरुणस्सूर्यवेदांगोभानुरिंद्रोरविस्तथा गभस्तिश्चयमस्वर्णरेतादिनकरस्तथा
मित्रोविष्णुरितिप्रोक्ताद्वादशामीदिवाकराः द्वादशनोद्वादशादित्यानित्यर्थः द्वात्रिं
शन्नेमपत्रेधातारंध्यायेत ध्यानपूर्वकंपत्रेषुलिखित्वापूजयेत अत्रश्रात्माविशेषाक्त
लेपिसंप्रदायानुरोधान्नृसिंहानुष्टुभंरामानुष्टुभंवालिखेदित्यर्थः वषट्कारंचतद्बहिरि
ति तद्बहिर्द्वात्रिंशद्दलाद्बहिर्भागेषुस्वस्तुरतोवषट्कारंलिखित्वापूजयेतइतिशेषः भू
गृहंवज्रशूलाद्यैरेखात्रयसमन्वितं द्वारोपेतंचराश्यादिभूषितंफणासंयुतं ९८ तद्ब

पूता· २८ हिर्भूगृहं चतुरस्रं कुर्यात कीदृशं वज्रशूलाभ्यामाढ्यं रेखाःसत्वरजस्तम अग्निकोणास्रासं
त्रयेणसमन्वितं द्वारोपेतमिति प्रागादिचतुर्द्वारयुक्तं राशयोमेषाद्या आदिशब्देन
वलिप्रभृतयः अत्रराशिवल्याद्यंतमेवदीक्षाकालेषु पूजायांतुफणिसंयुतमिति
संप्रदायः फणिभि अष्टकुलनागैःसंयुतः अनंतवासुकिनागोतक्षककालप
द्मनामतः महापद्मशंखकुलिका अष्टौनागाःकुलस्यविख्याताः एवंमंडलमालि
ख्यतस्यदिक्षुविदिक्षुच नारसिंहंवाराहंचलिखेन्मंत्रद्वयंतथा ६९ एवंमंडलमालिख्य
तस्यमंडलस्यदिक्षुप्रागादिदिक्षुनारसिंहबीजंविदिक्षुअग्न्यादिषुवाराहबीजंएतन्मं राम २८
त्रद्वयंलिखेत नृसिंहबीजमुद्धरति क्रूरोरेफाढ्यहंतुनादशक्त्यादिभिर्युतः योनृसिं
हःसमाख्यातोग्रहमारणकर्मणि ७० क्रूःक्षकारःरेफारकारःअनुग्रहऔकारःश्री

कंठादिन्यासस्यानुग्रहदेवतावलात् इंदुर्विंनादुःप्रणवस्यपंचमोवयवः शक्तिःषष्टः
आदिशब्देनशांताख्यःसप्तमः योनृसिंहइति एषनृसिंहःसमाख्यातःनृसिंहवीज
मुक्तं कीदृशोनृसिंहःग्रहाणां उपलक्षणयानृत्याग्रहभूतप्रेतादीनांमारणकर्मप्र
शस्तः व राहवीजमुद्धरति अत्याधीशवियद्विंदुनादैर्वीजंचसोकरं हुंकारंचात्र
रामस्यमालामंत्रोधुनेरितः ७१ अंतस्थितःअवीशेश्वरसंवंधीउकारोयस्यईदृशा
वियद्धकारस्तेनविंदुनानादेनचसोकरंवाराहवीजंसमाख्यातं उद्धारेणअभिज्ञाना
स्फुटीभूतमपिवीजंअज्ञात्वातिविशदयन्नेवप्राकृतश्चित्तं रामस्यमालामंत्रमुद्धरति
हुंकारंचेति हुंकारस्वरूपमेवसोकरंवीमित्यर्थः मालामंत्रोद्धारंप्रतिजानीते
अत्ररामस्येति अत्रशाखस्यअधुनारामस्यमालामंत्रईरितःइत्यर्थोक्तोवर्नेने तारो

शा.ता. नतिश्चनिद्रायाःस्मृतिर्मेदश्चकामिका रुद्रेणसंयुतावह्निमेधामरविभूषि ता। ७२
२९ दीर्घाक्रूरयुताल्हादिन्यंथ्यादीर्घासमानदा क्षधाक्रोधिन्यथ्यामोघाविश्वमथ्यथमेध
या ७३ युक्तादीर्घाज्वालिनीचमसूक्ष्मामृष्टत्वरूपिणी सप्रतिष्ठाल्हादिनीत्वकोत्वे
लःप्रीतिःश्रमारता ७४ ज्योतिःतीक्ष्णाग्निसंयुक्ताश्वेतताञ्स्वारसंयुता कामिकाप
चमोल्लांतसंज्ञातातोधांतइत्यर्थो ७५ समानंतादीर्घयुतोवायुःसूक्ष्मयुतोविषः
कालोप्राणोभोविद्ययायुतं ७ कामिकाकामिकारुद्रयुक्तार्थोथस्थिरासए ७६
तापिनीदीर्घयुक्ताभूरनिलोनंतगोनलः नारायणात्मकःकालोप्राणोभोविद्यया
युतं ७७ पीतारतिसमथ्यालांतोयान्त्यायुक्तोततोनतिः सप्तचत्वारिंशद्वर्णोयुगणानः
स्वगणस्त्वयं ७८ तारोनतिश्चेत्यादिस्वगणस्त्वयमित्यंतं तारःप्रणवःनतिर्नमःशब्दः राम २९

निद्रायाःनिद्राख्य कलारूपात भकारादनंतरं स्मृतिकालासंवंधीगकारः मेदोधातुसं
वंधीवकारः कामिकाकलासंवंधीतकारः सचरुद्रैणोकादशस्वरेणासंयुतासंयु
क्तः कामिकाशद्वस्यस्त्रीलिंगत्वात्संयुक्तेतिस्त्रीनिर्देशः वह्निरेफः मेधाख्यकलासं
वंधीघकारः सचामराख्यश्रीकंठादिईश्वरसंवंध्युकारेणासंयुतइत्यर्थः दीर्घाख्यक
लासंवंधीनकारः सचाक्रूरयुताक्रूरेणानुस्वारः अक्रूरस्यानुस्वारस्थनित्वात ल्हादिन्या
ख्यकलासंवधीदकारः दीर्घाख्यकलासंवंधीनकारः सचमानदाकलातत्संवंध्याकारे
णासहितः क्षुधाकलासंवंधीयकारः क्रोधिन्याख्यकलासंवंधीरकारः अमोघाख्यकला
संवंधीलकारः विश्वन्नामविश्वात्मावासुदेवस्तत्संवंधीकेशवादिन्यासस्थओकारः मेधाख्या
कलासंवंधीघकारेणायुक्तादीर्घानकारः ज्वालिनीकलासंवंधीवकारः सचसूक्ष्माख्यश्व

ता॰सू॰ रेदेवताईकारेणसहितः सूक्ष्मरूपिणीनामकलातत्संबंधीशकारः सप्रतिष्ठेति ल्हादि
३० न्याख्याकलासंबंधीरकारः सप्रतिष्ठाकलासंबंधाकारेणसहितः त्वमध्यात्मसंबंधी
शकारः स्वेलोविषंतत्संबंधीमकारः सचामरेश्वरसंबंधुकारेणसहितः ज्योतिरग्नि
रेफः तीक्ष्णाख्यकलासंबंधीपकारः सचाग्निनारेफेणसंयुतः श्वेताख्यकलासंबंधी
सकारः सचानुस्वारसंयुक्तः कामिकाख्यकलासंबंधीतकारस्यपंचमोनकारः लां
तोवकारः तांतांततःतस्यश्रंतःयकारः तस्याप्यंतोरकारः धांतोनकारः ससानंतःश्र
नंतश्चाकारस्तेनसहितः वायुर्यकारोदीर्घयुतः दीर्घःश्रकारस्तेनयुतः अत्रव्याकरणा
नुरोधेनयाकारोद्धारः अक्षराणानायेत्वयकारश्रकारश्चसंधिमक्लेवगणानीयो
तेनवक्ष्यमाणसप्तचत्वारिंशद्वर्णत्वमविरुद्धं विषामकारःसचसूक्ष्माख्यश्वरदेवता राम ३०

काइकारसंयुक्तः कामिकांतकारः पुनरपिकामिकांतकारःसचरुद्रोकारदशस्वरेणायु
क्तः अर्थार्थात्पत्रमष्टह्यसंज्ञायाआभावःक्षांतस्तः स्थिराख्यकलासंबंधीजकारः सइ
तिस्वरूपं एइतिचस्वरूपंमित्यर्थः तापिन्याख्यकलासंबंधीवकारः अष्टत्रिंशत्कलान्या
मलकारवकारयोआप्यायनीसंबंधप्रसिद्धः भूर्लकारोदीर्घेणाकारेणायुक्तः अनिलायका
रः अनंतगोनलः आकारस्यारेफइत्यर्थः नारायणात्मकःकालइतिआकारसहितो
मकारः प्राणोवायुः यकारः अभवदर्कवकारः विद्ययाइकारेणयुक्तं पीताख्यकला
संबंधीषकारः रतिकलासंबंधीणकारः षष्ठिः लांतोवकारस्यान्याएकारेणायुक्तःत
तोनंतरंनतिर्नमःशब्दः ॐनमोभगवतेरघुनंदनायरक्षोघ्न विशदायमधुरप्रसन्नवदनाय
अमिततेजसेबलायरामायविष्णवेनमः इतिमंत्रश्लोकार्थःसप्तचत्वारिंशदिति अथराज्या

पू॰ता भिषिक्तस्य तस्य रामस्य स्वगणुर्मालामंत्रः सप्तचत्वारिंशदक्षर इत्यर्थः कीदृशोयंस
३१ त्वरजस्तमांसि त्रैतः स्वरूपं यस्य सोगुणांतस्त्रिगुणात्मक इत्यर्थः सात्विकादीनामु
पासकानां सात्विकादिफलदातृत्वात् तु शब्दो मंत्रांतरेभ्यः प्रकर्षद्योतनार्थः अयं
मंत्रो राज्याभिषिक्तस्यैव रामस्य न तु वनवासिन इति द्योतयितुमुक्तं राज्याभिषिक्त
स्य तस्य रामस्योक्तक्रमाल्लिखित इदं सर्वात्मकं यंत्रं प्रागुक्तमृषिभिः सेवितं ७९ यंत्रूले
खप्रकारमुपसंहरति उक्तक्रमादिति उक्तयंत्रोपजीविनां फलमाह सेवकानांमो
क्षकरमायुरारोग्यवर्द्धनं अपुत्राणां पुत्रदं च बहुनाकिमनेनवै ८० प्राक्तवेति
ह्मणान्संध्यागत्रधर्मादिकानपि इदं सर्वात्मकमिति इदं प्रागुक्तं यंत्रं सर्वात्मकंम राम
षिभिर्वसिष्ठादिभिः सेवितं सेवकानांमोक्षप्रदं तथायुरारोग्यवर्धनं अपुत्राणांच ३१

प्रत्ययं न विदं यंत्रं मोक्षप्रदमेव त्रिवर्गदं तु न स्यादित्याशंक्याह वक्तुं नेति वह्नेकेन किं
अनेन यंत्रेणावेनिश्चितं तत्क्षणात्समीचीनात्तूत्कृष्टात्धर्मादिकाश्चत्वाक्वंति इदं च
यंत्रमतिगोप्यमित्याह इदं रहस्यं परममीश्वरेणापि दुर्गमं ८१ इदं यंत्रं च परमं गुप्तं
यत ईश्वरेणापि दुर्गमं दुर्बोधमित्यर्थः इदं यंत्रं समाख्यातं न देयं प्राकृते जने इति अत्र
समाख्यातमिदं यंत्रं प्राकृततेजने समान्यनीचेन देयं इतिशब्दो वक्तव्योपनिषत्समा
प्त्यर्थः पूजांगयंत्रं च वक्तव्योपनिषद्युक्तं संप्रति प्रधानभूतानां पूजां निरूपयितुं पंच
मोपनिषत्प्रवर्तते भूतादिकं शोधयेद्द्वारपूजां कृत्वा पद्मासनस्थः प्रसन्नः अर्घा
विधावस्यपीठाधारोर्ध्वपार्श्वार्चनेनमध्यपद्मार्चनं च ८३ भूतादिकं शोधयेदित्यादि
पृथिव्यन्ते स्वासनाधः प्रकल्प्येत्यंतं सुगमं भूतं पृथिव्यादिपंचकं आदिशब्देनात्माप्र

ता॰पू॰ तिमापूजांद्रव्यंक्षितिश्चष्टव्यंते तत्रभूतशुद्धिः शोषणदाहनप्लावनैः आत्मशुद्धिर्वैयग्र
ग्र्यविरहात् प्रतिमाशुद्धिः पूर्वपूजानुलेपनक्षालनेन पूजाद्रव्याणांशुद्धिःकेशकी
टाद्यपाकरणेन क्षितिरूपालेपनरंगमालादिनाज्ञेयं पूजकोभूतादिकशोधयेदि
त्यन्वयः कीदृशःपूजकःद्वारपूजाचतत्रपिद्वारेषुविहितांपूजांकृत्वापद्मस्वस्तिका
सनस्थःप्रसन्नःचित्तेनेर्मल्यवान् अस्यप्रकृतस्यरामस्यविघ्नारितिवा पूजाविधो
कर्तव्येसतिपीठाधरोर्ध्वपार्श्वार्चनेपूजाविधौकर्तव्येसति विघ्नदुर्गामित्यादीन्पू
जयेदितितृतीयश्लोकेनान्वयः किंकृत्वापीठाधारोर्ध्वअर्चनेकृत्वापार्श्वार्चनेकृत्वा
मध्यपद्मार्चनेकृत्वाप्रयोगस्तु पीठस्याधरभागायनमः पीठस्योर्ध्वभागायनमः पीठस्य राम
पूर्वपार्श्वायनमः पीठस्यदक्षिणपार्श्वायनमः पीठस्यपश्चिमपार्श्वायनमः पीठस्य ३२

उत्तरपार्श्वायनमः इतिपीठाधरादिपूजा अथपीठमध्यगतकमलायनमः कृत्वामृदुस्नस्तां
मात्तलिकांगरत्नासनेदेशिकंचार्चयित्वा शक्तिंचाधाराख्यकांकूर्मनागौपृथिव्यंचस्वासन
मुपकल्प्य ८४ मृदुस्नस्तांतिपीठाद्द हरिरेवास्यवामभागेमृदुकोमलास्तृतांस्निग्धास्तूत
लीशोभनात्तल्पादितस्याध्यात्तायांभाविंतरत्नमिश्रितसिंहासनेभाविते देशिकमाचार्यंचा
र्चयित्वा स्वासनाधःस्वाभिन्नतयाध्यातरामस्यासनपूजांपीठंतस्याधोभागेआधाराख्यश
क्त्यादिपंचकंप्रकल्प्यअत्रायंप्रयोगः पूजापीठस्याधोभागेआधारशक्त्यैनमः तदुपरिकू
र्मायनमः तदुपरिशेषायनमः तदुपरिपृथिव्यैनमः तदुपरिकमलायनमः विघ्नंदुर्गांक्षे
त्रपालंचवाणींवीजादिकांश्चाग्निदेशादिकांश्च पीठस्यांघ्रिष्वपिधर्मादिकांश्चनञपूर्वा
न्गात्रस्यादिष्वर्चयेच्च ८५ अग्निदेशादिकान्आग्नेयनैऋत्यवायव्येशानदेशकान्वीजादि

कान् गंडूत्वे सएतद्वीजपूर्वकान् गणेशदुर्गाक्षेत्रपालसरस्वतीर्देवानर्चयेत अत्रायं
प्रयोगः पीठस्याग्नेय्यां दिशि गं गणपतये नमः नैरृत्यां डुं दुर्गायै नमः वायव्यां क्षं क्षे
त्रपालाय नमः ईशान्यां सं सरस्वत्यै नमः पीठस्याग्निष्विति अग्नेयादिकोणक्रमेणैव
धर्मादिकान् धर्मज्ञानवैराग्यैश्वर्याण्यर्चयेत नञ्पूर्वो विति दिक्षु पूर्वादिदिक्चतु
ष्टये नञ्पूर्वांस्तान् अधर्माज्ञानावैराग्यानैश्वर्याण्यर्चयेत मध्ये क्रमादर्कविध्वग्नितेजां
स्युपर्युपर्यउमेरङ्कितानि कमलमध्ये उपर्युपरि क्रमादर्कविधुग्नितेजांसि अउमेरका
र उकारमकारैः प्रणवांशभूतैः अंकितानि समन्वितानि अर्चयेदित्यन्वयः अर्थः रजः
सत्वतम एतानि रत्नत्रयं वीजाद्यं क्रमाद्भावयेत्तच ९६ रजःसत्वतम एतानि सत्वादिके राम
मणावीजाद्यं सरजं एतत्सर्वकं यथास्यात्तथाष्टनत्रपत्रेन भावयेत चकाराद्चर्चयेदपि ३३

नमंतरात्मानं

अत्रायं प्रयोगः कमलमध्ये ॐ अर्कायनमस्तदुपरि ॐ सोमायनमः तदुपरि ॐ अग्नये
संसत्वाय रंरजसे तंतमसे नम आशाख्याशाख्ययात्मानं वा परमात्मानं ततः ज्ञा
नात्मानं चार्चयेत्तस्य दिक्षु मायाविद्येकलापरतत्त्वे ८७ अंतः कर्णिकायां मध्ये आ
शाख्यपूर्वादि दिक्षु आत्मादीश्वरांतरः पूजयेत् आशाख्यपि विदिक्षु पितानेव पूजये
त् न चावरणपूजादिवद्धि दिक्ष्वात्मादीन् दिक्षु च निवृत्त्यादिकाः पूजयेत् वचनप्रमा
णात् तस्य दिक्षु इति तस्य कमलस्य पूर्वादिषु दिक्षु मायातत्त्वं विद्यातत्त्वं कलातत्त्वं
परतत्त्वं च पूजयेदित्युत्तरेणान्वयः पूर्वमेव पारंपार्यं च तत्त्वं चेति पारतत्त्वमित्यत्र स्वार्थे
ण प्रत्ययः संपूजयेद्विमलादीश्च शक्तीरभ्यर्चयेद्देवमावाहयेच्च विमलोत्कर्षिणी
ज्ञानाक्रियायोगाप्रह्वासत्याईशानानुग्रहाख्या नव शक्तीः पूर्वादि दिक्षु मध्ये आवा

ता॰पू॰ ३८ हयेद्देवमावाहयेच्च विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वा सत्या ईशानुग्रहाख्या
नवशक्तिः पूर्वादिदिक्षु मध्ये आवाहयेदर्चयेच्च देवं श्रीरामावाहयेच्चकारादर्चयेच्च आ
वरणपूजामाह अंगव्यूहानिलजाद्यैश्च पूजा धृष्ट्याद्यैर्लोकपालैस्तदस्त्रैः अंगा ८८३
नि हृदयादीनि व्यूहः शब्देनात्मादयः शक्तिकावासुदेवादयश्च अनिलजाद्यैरिति अ
रष्टभिः५ निलजो हनुमांस्तदादिभिः पूज्य पूजपित्वा धृष्ट्याद्यैरष्टभिः मंत्रिभिः लोकपालैरि
न्द्रादिभिः तदस्त्रैर्वज्राद्यायुधैर्वज्रादिकैः सहितं राघवं आराधयेदित्युत्तरश्लोकेना
न्वयः वसिष्ठाद्यैर्मुनिभिः नीलमुख्यै राराधयेद्राघवं चंदनाद्यैः मुख्योपहारैर्विविधै
श्च पूज्य तस्मिन् जयादीश्च सम्यक् समर्प्य ८९ वसिष्ठाद्यैर्मुनिभिः शत्रुघ्नाद्यैर्दशभिर्नील राम
मुख्यैः षोडशभिर्वानरैः परिवृतं राघवं चंदनाद्यैः पूजयेत आदिशब्देन पुष्पधूपादयः श्र ३८

ष्टपवित्रैर्नैवेद्यैः पूज्यपूजयित्वा तस्मैराघवायसम्यक्कुजपादीन्समर्प्यराघवमाराधयेदि
तिसंबंधः अथपूजांगध्यानमाह एवंभूतंजगदाधारभूतंरामंवंदेसच्चिदानंदरूपं गदाज
शंखवरिधरंभवारिंसयोध्यायेन्मोक्षमाप्नोतिसर्वः १० एवंभूतंसच्चिदानंदरूपंजगदाधा
रभूतंरामंवंदे कीदृशंजंगदाशंखचक्राब्जधरंअशिवहः चक्रवाचकःभवस्यसंसारस्यारि
निवर्तकं ध्यानफलमाह सयइति यःकश्चिदपिध्यायेत्ससर्वोपिमोक्षमाप्नोतिउक्तध्या
नफलेसदृष्टांतमाह विश्वव्यापीराघवोयस्तदानीमंतर्दधेशंखचक्रगदाब्जे धृत्वारमासहि
तःसंधृतस्वसपत्ननःसानुजःसर्वलोकी ११ एवंयोरघुवंशआविर्भूतोराघवोरामःसयथा
संवृतःपरिवारसहितःसपत्ननःनगरनिवासीसर्वलोकसहितःतदानीस्वर्गारोहणासमये
शंखचक्रगदाब्जेधृत्वारमासहितोदृष्टःसन्नंतर्दधे तद्भक्तायलब्धकामांश्चमुक्तातेयापरे

परमं यांतीति च स्वप्रकाश इति ज्ञानात्मके स्वरूपे एव स्थिताः तथा ये भक्ताः ते पि लब्धकामा
नु श्रीरामोपासनप्राप्तकामानभुक्त्वा परमं पदं यांति चिन्मय इत्यारभ्य एतदंतस्य कु
पाठफलमाह इमाश्चर्चः सर्वकामार्थदाश्चैव ये ते पठंति अमला यांति मोक्षं ये तं पठं
ति अमला यांति मोक्षमिति ८२ ये सर्वकामार्थदायिनीरिमा ऋचः पठंतीति निर्मला
भूत्वा मोक्षं यांति अभ्यासः ते निर्मला भूत्वा मोक्षं यांति अभ्यासः पंचमोपनिषत्समाप्त
र्थः इति शब्दः पूर्वार्द्धसमाप्त्यर्थः ॥ ॥ इति श्रीमद्विश्वेश्वरविरचितायां श्रीरामता
पिनीपूर्वार्द्धटीकायां पंचमोपनिषत्समाप्तः पूर्वार्द्धसमाप्तं ॥ ॥ ॥ ३५

म२

उ.ता
१ श्रीगुरुभ्यो नमः ॐ नमः परमात्मने सर्वविघ्नोपशमा नमः सत्यं तारकतत्त्वमोमिदमणु
स्थूलं च तत्त्वपदकं जाग्रत्स्वप्नसुषुप्तिगं स्मृतिवशाद्विश्वाद्यतीतं विभुं भूमासातत उपास्य
मानममरैः स्तुत्यं तुरीयात्मकं कान्तानुग्रहविग्रहं जनकजाजानिं भजे राघवं १ यः शाद्वप
रिनिष्ठितोथ परमेव ब्रह्म एप नित्यायतो यत्कारुण्यपरस्सुधीर्हृदि विंदुकणिका संसारसंताप
त्रुत यद्गाम्भीर्यमगाधमप्यनुचैरेगीधं समाश्रीयते तस्यानस्य श्रीगुरोरुदारचरणाद्वं
द्वारविंदं नमः २ आसीद्वाशिष्ठवंश्यान्नृहरिरिति पुरा केशवाख्यस्य सूनुः तस्मात्कमला
कत्व योभूद्धरिणा हस्सःपने कुंडिनाख्यि तस्मात्कृतं श्रुणाद्धिं समजनि कमलाबा
प्रभूत्पायतीनामानंदाख्यः सरामाविदधे साधुटीकां वनाख्यः ३ श्रीरामोत्तरतापनी राम
यविलसत्कृत्यर्थं संशोधनव्याजेनार्ज्जितजन्मकोटिदुरितध्वंसानुवसात्कृशा टीका १

स्वात्महितार्थमेवविदुषांबोधायमानोच्यतेतत्कृतंतत्प्रमनाथदीनपतिभिर्विस्मृत्यमेद्धा
पल्ले ४ आनंदनिधिनाम्नीयंटीकाप्रोद्धाट्यतेमया रामचंद्रमणिंप्राप्यकर्तुंसाम्राज्यम
द्वयं ५ इहखलुसकलप्राणभृतांसुखार्थित्वंदुःखार्थित्वंचध्यायमानत्वात्सुखा न३
सादित्साद्दुःखजिहासयोरनिवारितप्रायोलोकश्चितत्कृतसुकृतनिचयखचितचरमक
लेवरकमनीयतयावश्यंभाविदुःखाविनाभूतत्वेनसातिशयत्वेनचविषयजनितंसुखं
दुःखमेवेतिमत्वासकलसंसाराद्विरक्तोपरमपरोभवति उपरतःसंत्संसारमलोन्मूला
नापयतते संसारस्यब्रह्मात्मैकत्वापरिज्ञानविलसितत्वाद्ब्रह्मात्मैकत्वज्ञानेनैवतस्या
च्छेदसंभवादमणीयतरांश्रीरामब्रह्मविद्यांसिसाधयिषया श्रीरामोत्तरतापनीयोपनि
षत्सगुणोपासनफलभूतनिर्गुणश्रीरामोपासनपरतयाप्रवक्ष्यते यद्यप्यत्रोपनि

ता॰ षट्पदस्य उपनिषद्पूर्वोक्तरीत्या मंत्रस्यैव मुख्यया वृत्त्या श्रीरामब्रह्मविद्यापरत्वं तथा
२ पि लक्षणया वृत्त्या ब्रह्मविद्यार्थीयं श्रुतावपि ब्रह्मविद्याप्रवृत्तिः मुख्यैव शब्दस्य वृत्तिर्न प्र
लक्षणेति न च वाच्यं दृष्टेरुभयोरपि शब्दप्रवृत्तित्वेन स्वीकारात् ननु भवतु श्रुति
रूपग्रंथोप्युपनिषत् तस्यापि न व्याख्या नार्हतामासादयेत् देहेंद्रियांतःकरणवि
लक्षणात्मनः कर्मविधिशेषत्वेन श्रुतिपरत्वान्नहि विलक्षणमात्रेणात्मस्वरूपं शक्यमा
कलयितुं अत एव अयमात्मा ब्रह्म तत्वमसीत्यादिमहावाक्यैर्ब्रह्मात्मैकत्वलक्षणमा
त्मत्वे निरूप्यत इति अगतार्थत्वेन व्याख्यानार्हत्वमासादयेदेव ननु कर्मकांडदे
वताकांडयोः फलपरत्वादेकस्यैव वेदस्य वाक्यभेदप्रसंगेन न व्याख्यामार्हत्वमिति राम
चेत् न कांडत्रयस्यैकवाक्यताप्रसिद्धेः कर्मकांडे तमेतमित्यनया विविदिषाश्रु २
तत् विलक्षणत्वस्यैवोपपादितत्वात्

ण्या यज्ञदानादिभिरंतःकरणशुद्धिमुत्पाद्य देवताकांडे चोपासनया शुद्धांतःकर
णैश्चित्तस्थैर्यं शिक्षित्वा ज्ञानकांडे त्वंपदार्थद्वयपरिशोधनेन च जहदजहल्लक्षण
याब्रह्मात्मैकत्वं प्रतिश्रवणादिना प्रयतितव्यमिति कांडत्रयसंगतिर्भगवद्भिः
श्रीमच्छंकराचार्यैरेव दर्शिता नातः पृथक्प्रयत्न आश्रीयते ननु भवतु कांडत्रय
संगतिस्तथापि विदंताशब्दस्याद्वदस्य च श्रीरामब्रह्मपरत्वासंभवान्न व्याख्यायु
क्तिप्रतीयतः शब्दप्रवृत्तिनिमित्तं त्रिधा मुख्यालक्षणा गौणी चेति मुख्यापि द्विविधा
रूढियोगभेदेन तत्र रूढिस्तावद्ब्रह्मणि न प्रवर्तते तस्य शब्दागोचरत्वात् तस्याश्च
स्वरूपजातिगुणनिर्देशार्हे वस्तुन्येव डित्थः गौः शुक्ल इति संज्ञासंनिमित्तकेन प्रवृ
त्तेः नापि योगी नापि लक्षणा ब्रह्मणा संगत्वेन संबंधाभावात् योगस्तेन निराकरि

ता० ३ ष्यमाणत्वाल्लक्षणायाश्चसंज्ञासंज्ञिसंकेतेनाभिहितार्थसंबंधिनिचवक्ष्यतिगौणा
यांयोगइतिवत्प्रवृत्तेः यथाहुः अभिधेयाविनाभूतप्रवृत्तिर्लक्षणेष्यतइति नगौ
णीब्रह्मणोनिर्गुणत्वात्गौणायास्त्वभिहितार्थलक्षितगुणयुक्तेतत्सदृशेसिंहोमा
णवकइतिवत्प्रवृत्तेः यथाहुः लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टातुगौणतेति योग
वृत्तेरसंगत्वाद्धेतोरेवनब्रह्मपरत्वं तस्याश्चरूढिलक्षणागुणत्रिविधवृत्तिप्रतिपा
प्रकृति४ दितपदार्थयोर्वीप्सत्वपार्थयोर्वायोगेनवापंकजमोपगवःपाचकइत्यादिवत्प्र
वृत्तेः अस्याश्चरूढिलक्षणागुणत्रिविधवृत्तितोब्रह्मणःपदार्थत्वायोगात्प्र ८
र्थस्यचवाक्यार्थत्वायोगान्नश्रुतिगोचरत्वं अत्रोच्यतेब्रह्मणःशब्दागोचरत्वे राम
नासंगत्वेननिर्गुणत्वेनचश्रुतिगोचरत्वेसाक्षान्माभूत्तथापिसगुणद्वाराणि ३

गुणेसमन्वयाध्यक्तमेवब्रह्मपरत्वंवेदानां तथाहि यःसर्वज्ञःसर्वविद्यस्यज्ञान
मयंतपःसर्वस्यवशीसर्वस्येशानः यःपृथिव्यांतिष्ठन्पृथिव्याअंतरःसोकामय भ३
तबहुस्यां सऐक्षत तत्तेजोसृजत सत्यंज्ञानमनंतंब्रह्मेत्याद्याःश्रुतयोगवंतेषड्गु
णैश्वर्यसंपन्नेसकलकल्याणगुणनिलये सर्वज्ञंसर्वशक्तिंसर्वेश्वरंसर्वनियं
तारंसर्वोपास्यंसर्वकर्मफलदातारंसच्चिदानंदंसगुणंगुणानभिभूतंश्रीरामंप्रतिपा
दयंतितत्वमस्यादिवाक्यानितुतादृगीश्वरत्वाभावाज्जीवस्यसंसारनिवृत्तिद्वारात
त्वप दयोःसामानाधिकरण्यप्रतीत्यन्यथानुपपत्त्यानिर्गुणपर्यवस्यंति नतावत्सा
मानाधिकरण्यंवैश्वदेव्यामिक्षेतिवदुभयोरेकार्थाभिधाने न कुतःभिन्नार्थत्वात य
थोक्तं आमिक्षांदेवतायुक्तांवदत्येवैषतद्धितः आमिक्षपदसांनिध्यान्नैषेवविषया

ना· र्पणमिति नचाजहत्स्वार्थयोःसामानाधिकरण्यंनिरूढलक्षणयाविशेषणवि
६ शेष्यभावेननीलमुत्पलमितिवत् कुतःविरुद्धार्थत्वेनतदयोगात् तदुक्तं स्वबु
ध्यारज्यतेयेनविशेष्यंतद्विशेषणमिति नचजहत्स्वार्थत्वेनसंबंधिलक्षणया कु
क्षमितडुमागगाइतिवत् कुतः एकार्थत्वस्याविवक्षितत्वात् अतोजहदजह
त्स्वार्थलक्षणयासोयंदेवदत्तवद्विरुद्धांशत्यागेनानुगतचिदंशेनैकार्थ्येनसा
मानाधिकरण्येननिर्गुणपर्यवसाने अस्थूलादिवाक्यानांतत्साक्षादुपाधिनि
षेधेन उपासनावाक्यानांत्वन्यार्थप्रवृत्तस्यष्ठ्याद्यवलंबनेनसाधनविधानेननि
र्गुणेपर्यवसानं अस्थूलादिवाक्यानांतत्साक्षादुपाधिनिषेधेन उपासनावाक्या राम
नांत्वन्यार्थप्रवृत्तस्यष्ठ्याद्यवलंबनेनसाधनविधानेननिर्गुणब्रह्मपरत्वेनिराकु ४

त्वमेव ब्रह्मकारिणां सगुणोपासनेन निर्गुणोपायिकं चिन्मयस्यादि पंचोपनिषदानि
रूपितं इदानीमुत्तमाधिकारिणां कर्मसु तत्फले च विरक्तानां संन्यासिनां परमहंसा
नां श्रीरामोत्तरतापनीयोपनिषदा तदेव निर्गुणोपासनं सगुणफलश्रुतं निरूप्यते
सेव श्रीरामचंद्र ब्रह्मविद्यामविद्यापनोदिनीं प्रकटयितुं कदाचिन्मिथिलोपवने ज
नको वैदेहस्यासांचक्रे तत्र च योगीश्वरः शिष्यसंघैर्मुनिगणैश्च परिवृतः आसी
त तत्रानेकैर्मुनिवरैः सब्रह्मवेत्तृत्वमसहमानैः पृच्छ्यते एवमस्ति तत्र बृहस्पतिर्गु
रुवाच याज्ञवल्क्यं यज्ञवल्क्यस्यापत्यं यत्प्रसिद्धमनु पश्चात् सर्वस्मादूर्ध्वं पुण्यपाति
शयचरमकोटिनिविष्टः सर्वोत्कृष्टपुण्यफलमितियावत् कुरुक्षेत्रं कुत्सितं रोतीति
कुरु पापकर्मसंसारहेतुभूतं तत्संक्षेपणान्निरसनाद्वा त्रायतीति क्षेत्रं क्षेत्रे हितमूल

दै त्रं

ता॰
५

वणादिनिरस्यति यद्वा कुः पृथिवी देहाद्याकारपरिणतातस्यां रौतिरावं करोतीति कु
रुः प्राणस्तस्य क्षेत्रं रावकर्तुः प्राणस्य निवासस्थानं तत्कुरुक्षेत्रं प्राणस्याधिष्ठान
मित्यर्थः देवानामिंद्रियाणां तदधिष्ठातृणां वा देवयजनं देवस्य स्वयंप्रकाशस्यात्मा
नः द्योतनात्मकांतर्यामिणः श्रीरामचंद्रस्येत्यर्थः यजनं पूजाकरणं यत्र हीन्द्रिया
णि विविधविषयोपहारैः स्वयं राभिधमात्मानं श्रीरामचंद्रं पूजयंति तथा च वार्त्ति
ककाराः भोगाश्चित्रदेवसमानंतेति सर्वेषां भूतानां समष्टिव्यष्ट्यात्मकानां ब्रह्मस
दनं ब्रह्म श्रीरामाख्यं देशकालवस्तुपरिच्छेदशून्यं तथा च वार्त्तिककाराः भोग
तदेवसदनं निवासस्थानं यद्विशेषणद्वयविशिष्टं कुरुक्षेत्रं तत्किमिति शेषः उत्त
रमाह अविमुक्तं अविद्याकामकर्मादिभिर्मुक्तमप्यविद्यादशायाममविमुक्तं वैध

राम
५

सिद्धं ब्रह्मपुरुषशब्दवाच्यं तच्च द्विविधं पूर्णं तत्पदं उपाध्युपलक्षितं रामे पुरिशयानं
त्वंपदं उपाधिधर्मानात्मनि मन्यमानं च तदुक्तं उपाधिरज्ञानमनादि सिद्धमस्मिंश्चि
दाभासनमीश्वरत्वं उपाधिरंतष्करणं तन्मर्थे जीवत्वमाभासनमस्य तद्वदिति तद
शोधितपदार्थद्वयभूतं ब्रह्मैव कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनमि
त्यनुवादः पदार्थद्वयपरिशोधनेनेकरसं ब्रह्मावस्थानं भवति यस्मात् तस्माद्यत्र
क्वचन यत्र क्वापि गंगाप्रयागादि तद्विपरीतं वा गच्छति तदेव तत्स्थलमिव मन्येत जा
नीयात कथं इति अनेन प्रकारेण प्रकारमाह इदं वै मया प्राप्तं स्थलमेव तदविमुक्तं ८
मेवेत्यन्वयः उक्तविशेषणमेवनान्यदिति पुनराह कुरुक्षेत्रं देवानां देवयजनं सर्वेषां
भूतानां ब्रह्मसदनमिति स्थलमेवाविमुक्तमित्युपचारेणाव्ययत्वसंपादनार्थं स्वरूप

ता॰उ॰ ते अत्रा।विमुक्ते कुरुक्षेत्रादिरूपे पदार्थद्वयपरिशोधने हि यस्मात् जंतोः पदार्थद्व
यसामरस्यमजानतो मुमुक्षोः प्राणेषु पंचप्राणज्ञानकर्मेंद्रियमनांसि षोडश तेषु
उत्क्रममाणेषु अभिमानाभावेन लीनप्रायेषु सत्सु तथा च स्मर्यते प्राणेन गतेन तथा
देहः सुखं दुःखं न विंदति तथा चेत्प्राणेषूत्क्रांतेपि स केवल्याश्रमे वसेदिति रुद्रः रु
तद्दुःखमविद्या तत्कार्यं प्रभूतं द्रावयति नाशयतीति तथा ईश्वरस्य तत्पदार्थो राम
एवाचार्यो भूत्वा आचार्यवान् पुरुषो वेदेति श्रुतेः तारकं तारात्मकत्वात् तथा सर्व
स्मात् संसारभयात् संतारयतीति वा तथा ब्रह्म तारकविशेषणविशिष्टं ब्रह्म ब्रह्मवि राम
द्या ब्रह्मात्मैक्यबोधकं महावाक्यं श्रीराममंत्रमिति यावत् व्याचष्टे कथयति येन ता
रकब्रह्मजनितज्ञानेन असौ रुद्रानुगृहीतो जीवः अमृती अमृतो भूत्वा ब्रह्मास्मी ६

त्यभिमानवान्सन्मोक्षीभवति स्वेनस्वयंज्योतिःस्वरूपरामात्मनावतिष्ठते राम
मंत्ररामयोर्वाच्यवाचकत्वेनाभेदात पूर्वस्यहेतोर्यस्माद्दृश्यस्यात्राश्रयः तस्माद
विमुक्तस्यशुद्धत्वंपदार्थस्यनिरुपाधिब्रह्मरामात्मतापत्तेः अविमुक्तमेवनिषे
वेत नितरांसेवेत विजातीयप्रत्ययानंतरितसजातीयप्रत्ययप्रवाहेणसाक्षात्कु
र्यादित्यर्थः अविमुक्तंनविमुंचेत यस्मिन्कस्मिंदेशेआत्मानुसंधानेनपरित्यजेत
तदुक्तंपादपूज्यैराचार्यैः त्वंपदार्थविवेकायसंन्यासःसर्वकर्मणां श्रुत्याविधीयते
यस्मात्तत्त्यागीपतितोभवेदिति एवंगुरुणायाज्ञवल्क्यस्यबुद्धिपरीक्षार्थंस्वस्यबुद्धि
शुद्ध्यर्थंवापृष्टेनयाज्ञवल्क्येनोक्तमंगीचकारबृहस्पतिः एवमेवैतत पदार्थद्वयैक्य
मेवाविमुक्तंकुरुक्षेत्रं देवयजनंब्रह्मसदनमितिपदार्थद्वयशुद्धिज्ञानवतः प्राणा

भि

रूपाधिविलयेईश्वरानुग्रहेणोत्कब्रह्मविद्ययाब्रह्मात्मैकं भवतीति भावः ब्रह्मैव सन्ब्र
ह्माप्येतीति श्रुतेः यद्वा प्रागजन्मनि संन्यासाद्यधिकारसंपादनेपि केनचिद्बलीयसा क
र्मणा कस्यांचिद्योनौ जडभूरिनवद्भुत्पन्नानामधिकारिणामनधिकारिणां सर्वेषाम
नुग्रहार्थं पृच्छति यत्प्रसिद्धं अत्र पश्चात् सर्वत्र विहरतो विहारार्थे परे सर्वतीर्थेभ्य
उत्कृष्टतमं भूमेरुत्तमांगमिति यावत् कुरुक्षेत्रं कुरूणां राज्ञां पालितं अनादिसिद्धं क्षेत्रं
देवानां देवयजनं देवैरिंद्रादिभिरपि देवः परमेश्वरो राम ईज्यते यस्मिन्सर्वेषां भूता
नां ब्रह्मादिस्थावरांतानां ब्रह्मसदनं ब्रह्माप्तिहेतुभूतं तत्किमिति शेषः विशेषण
द्वयविशिष्टं प्रसिद्धं कुरुक्षेत्रमेव कुरुक्षेत्रमन्यद्वेति संदेहे उत्तरमाह अविमुक्तं क
दाचिदपि विश्वेश्वरेणानविमुक्तं काश्यभिधं वैनिश्चयेन कुरुक्षेत्रं देवानां देवयज राम

७

नंसर्वेषांभूतानांब्रह्मसदनंअविमुक्तंवाउत्कृष्टतमंनास्तियस्मात्तस्माद्यत्रक्वचनगछ
तिपंचक्रोशेषुपंचकुत्रचिद्विचरति तदेवभूतेप्रदेशमेवमन्येत जानीयात् कथं इतिश्रु
तुनाप्रकारेण प्रकारमाह इदंवै इदमेवकुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्र
ह्मसदनमिति अत्राविमुक्ते हियस्मात् जंतोःप्राणिमात्रस्य प्राणेषूत्क्रममाणेषु
लोकांतरंगछत्सु रुद्रः दुःखहारित्वाद्रोदनाद्वा तारकंब्रह्मश्रीराममंत्रात्मकंव्याच
ष्टे दक्षिणकर्णेकथयति तदाह विश्वेशःश्रीरामेति मुमूर्षोर्मणिकर्णिकामर्धो
दकनिवासिनः अहंहरिशामितिमंत्रंतारकंब्रह्मसंज्ञितं अतस्त्वंजानकीनाथपरंब्रह्मा
सिनिश्चितमिति येनतारकब्रह्मविद्योपदेशेन असौजीवः अहमितीभूत्वाब्रह्मास्मी
त्यभिमानवान्मोक्षीभवति विदेहकैवल्यमापद्यते शुद्धांतःकरणःस्याचार्यरूप

ता॰ २ णोपदेशाद्विदेहतां जीवन्मुक्ततां वापादयपति किंपुनर्निजरूपेणानस्वसन्निधिलेश
वशाच्छुद्धतामुत्पाद्य विदेहतां भक्तवात्सल्येन गलगरल्लाद्विदेहदानेन जीवन्मुक्ततां
चापादयतीति नात्र तारकस्य व्यवस्थाकरणमुचितं उपदेष्टुर्वीकस्य च जलधिजल
ववदनसंख्यावबद्धत्कृष्टत्वात् ज्ञानादेव तत्त्वकैवल्यं तज्ज्ञानमालम्ब्यमत्र वयस्मात् त
स्माद्विमुक्तमेव निषेवेत अत्पादरेणासेवेत। अविविमुक्तं न विमुंचेत् ह्येत्र संन्या
संकुर्यात् अंगीकाराद्दाहयुरुः एवमेवैतद्याज्ञवल्क्येति नन्वेवमपि प्राणोत्क्रममा
णोषित्पनया श्रुत्या प्राणवतां जंगमानामेव तारकब्रह्मोपदेश इति चेत् न स्थावरा
णामपि प्राणधारणाविशेषात् न हि प्राणव्यतिरेकेणायस्य कस्यापि जन्मसंभवति राम २
यद्वकिंच प्राणएष्ट इति श्रुतेः यत्किंचेदं प्राणिजातं जातं जंगमेचप्रतिच यद्वात्रस्था

वरं सर्वं तत्वज्ञाने प्रतिष्ठितमिति स्मृतेश्च जंगमेषु प्राणिक्रममाणेन अभिव्यक्तिर्यथा
न तथा स्थावरेष्विति विशेषः भूतानां प्राणिनः श्रेष्ठा इति मनुवाक्यमप्यभिव्यक्त्यभि
प्रायमेव न त्वन्यत्राप्राणित्वप्रतिपादनपरं तर्हि शास्त्राधिकारित्वान्मनुष्याणामेवा
स्त्विति चेत् न पूर्वजन्मनिसृत्तसंस्कृतस्यापि केनचित्प्रतिबंधकेन कर्मणा यत्किंचि
द्दिहावगतो शास्त्रसाफल्याच्च नह्येकेन जन्मना विमुक्तिः सोलभ्यं बहूनां जन्मनामंते
ज्ञानवान्मां प्रपद्यत इति भगवद्वचनात् तथापि जडभरतवत्पूर्वसंनिधिविरहान्नेति
चेत् परबुद्धेरप्रत्यक्षत्वात् अविमुक्तिप्राप्त्यन्यथानुपपत्तिप्रमाणबलात्प्यावमम
तिपूर्वकृतसंन्यासाद्यधिकारः कर्मपरिसमाप्त्याभावादिति चेत् न प्रारब्धकर्मण एवो
पचरितत्वात् अविमुक्तिपर्यंतपूर्वजन्मेहजन्मकृतानां कर्मणाम प्रवेशेन प्रारब्धस्यत

उ.ना स्यकुलालचक्रभ्रमणवदाशरीरांतमवस्थानं नन्व प्रारब्धशेषवतामप्यविमु
८ क्तानिष्क्रमणं कथमिति चेदीश्वरानुग्रहाभावादिति ब्रूमः जडानां कर्मणां चेत
नेश्वरसहायापेक्षेति न्यायात तथा च स्कांदे ईश्वरानुग्रहादेव काशीवासः सुदुर्ल
भः सुलभस्यान्यनेनूनं नरैः सुकृतकोटिभिरिति ईश्वरानुग्रहात्काशीवास
कृतकर्मणामसंत्नयात्नोपदेश इति चेन्नाविमुक्तस्याखरत्वात उखरं पुण्यपापा
नां धान्यावाराणसी पुरी इदं प्रियं क्षेत्रमतिप्रियं मे संसारबीजोखरसूखराणामित्या
दिवचननिचये रूखरत्वं संगृह्यते वाराणस्यां कृतं पापं वज्रलेपो भविष्यति यथात्र
पुण्यकृतं तथात्र पापमित्यादिवाक्यविरोधान्नेति चेत न तेषामन्यपरत्वात अत्रकृ राम ८

तदुक्तिनामन्यत्रप्राप्तमरणपरत्वात् अश्मनाचरणोहत्वात्तत्रैवनिधनेच्छेजेदृत्या
दिवाकान्यतदर्थान्यपितत्रैवयथेष्टाचरणप्रसंगइतिचेन्नाविधानात् नह्यग्निहोत्रादि
वद्ब्राह्मणहननादिविधिःश्रूयते प्रत्युततत्प्रतिषेधश्चश्रूयते अशनेवसनेवितएषा
काश्यामसमार्गतःकीकटेनसमाकाशीसत्यंसत्यंखगाधिपेत्यादिवाक्यैर्यथेष्टाच
रणप्रतिषेधएवक्रियते नत्वनुज्ञाप्यते अविधेयत्वेपिकेषांचिद्विरुद्धाचरण
इतिदृश्यतएव सत्ये तस्यास्तत्रैवनिरसनात् काशीकृतपापिनोडुंडधरेणश्रीका
लभैरवेनत्रिंशत्सहस्रसंख्याकंकालेनानायोन्यस्यापच्यते नहिशरीरिणांनास्ति
पुनःशरीरमित्याद्युक्तवचननिचयव्याकोपइतिचेत् न प्राणोत्क्रमेणान्नणस्य
णनभोग्यत्वात् तथाहि सकलसंसारस्यमायामयत्वाद्यथास्वप्नमनोरथेवारि

दि सा२

ता० उ शांतरूपांतरसंवत्सरशतानुभवः यथा मार्कंडेयस्य सप्तकल्पानुभवः यथा नारद
१० स्यस्त्रीत्वाद्यवाप्ति लवणस्य वा मातंगस्त्रीपुत्राभिपतनं स्वप्नादिसंसारस्यासत्यत्वं
मार्कंडेयादिसंसारस्य सत्यत्वं कथमिति चेत वासनादार्ढ्यादिति ब्रूमः स्वप्ने हि वास
नाशैथिल्यमन्यदाद्यमनुभूयत एव तस्मादस्मिन्नेव शरीरे प्राणोत्क्रमणकालप
र्यंतं चरणफलानुभवांते तारकब्रह्मोपदेशादिदेहांते वमुक्तिरेके न जन्मनेत्युक्तात
त तर्हि यद्यस्मिन्कंठगरलमित्यादिवाक्यैर्देहावाप्तेन सायुज्यमिति चेत न तस्यापःक्रम
परत्वात तारकब्रह्मोपदेशसमानत्वेपीश्वरानुग्रहादिपरोक्षज्ञानेन सायुज्यमाप्नोती
ति तारकब्रह्मोपदेशान्निर्विघ्नेपो मोक्ष इति सिद्धं प्रथमकंडिकानिर्दिष्टस्य तारकब्र
ह्मणः स्वरूपकथनार्थं द्वितीयाकंडिकारभ्यते अथेत्यादिना अथ गुरूपसमनंत राम
१०
शैथिल्यान्मुमूर्षोरंतःकरणे वैकल्याद्वा परोक्षज्ञानोत्पत्त्यभावे निजगरलादिसारूप्यसामीप्यसा
लोक्यमनुभूयते सम्यगीश्वरानुग्रहात् ३

रमेवब्रह्मगोरवार्थः एवं याज्ञवल्क्यं भरद्वाज ऋषिः पप्रच्छ किं तारकं पूर्वं तारकं ब्रह्म व्याच
ष्ट इत्येवोक्तं न तु तत्स्वरूपमिति तत्पृच्छति किं तरतीति तरणविषयप्रश्नः इति शब्दः प्र
श्नद्वयपरिसमाप्तौ न हि साधनफलपरिज्ञानेनान्यत्ज्ञेयमवशिष्यत इति भावः ज्ञाने
परिसमाप्यत इति स्मृतेः स याज्ञवल्क्यः ह उवाच तारकमिति पूर्वोक्तमनूद्य कथयति
तारमिति पाठे ॐकार पूर्वकल्प उक्तो भवति ॐकारस्य तारनामत्वात तदुक्तं प्रपंचसा
रे श्रीमदाचार्यैः ॐकारो गुणवीजं प्रणवस्तारो ध्रुवश्च वेदादिः आदिः उ मध्यो आपरो
नामान्यमस्य त्रिमात्रिकश्चतया अस्य तु वेदादित्वात् सर्वमन्त्राणां प्रयुज्यते चादाविति
दीर्घानलं दीर्घाकारयुक्तमनलमग्निवीजं ऋद्धिदीर्घषष्ठद्वयरहितानां षण्णाम् व्याका
रादीनां दीर्घशब्दवाच्यत्वेपिप्रथमातिक्रमे कारणाभावादाकारस्यैवानेनपद

ता॰उ निर्वर्त्यत्वाच्च प्रकाशभूतेनानलेनाकारयोर्योजनमेवानवद्यं बिंदुपूर्वकं बिंदुः पूर्वो
११ जन्मभूः बिंदोः सकाशात्पूर्वं जन्म यस्येति वा बिंदुपूर्वमेव बिंदुपूर्वकं स्वार्थे कः श
ब्दब्रह्मार्थब्रह्मादौ तमएवाग्र आसीदित्यनया श्रुत्या सच्छब्दवाच्यमविद्याशबलं ब्र
ह्मैवोक्तं तदीक्षणेन क्षुभितगुणावेशशकलकरणानंतराविद्याकलाव्यक्तं चे
त्युच्यते ततः शब्दार्थगर्भवत्याविद्याबिंदुर्महत्तत्त्वं चेत्यभिधीयते महतोहंकारस्ततः पंच धी ५
तन्मात्राणि तेभ्यो भूतानि तेभ्योखिलं जगदित्येष सृष्टिक्रमः बिंदोर्नादः स च परा
पश्यंतिमध्यमावैखर्याख्यामवस्थामनुभूय स्वरवर्णपदवाक्यात्मको भवतीति श
ब्दसृष्टिक्रमः परस्य शब्दात्मनो ब्रह्मणश्चतस्रोवस्थाः समामनंति सतत्त्वविदः आ राम
ध्यातावत्परेतिगीयते यावल्लयाख्याशक्तिरितिशाक्तैः चितिरितिशैवैः कुंडलिनीति ११

योगिभिः प्रकृतिरितिसांख्यैः ब्रह्मेतिपाराशर्यैः बुद्धिरितिबौद्धैः स्वशक्त्याभिषि
तगात्वाद्युपाधिरसत्त्वेतिजातिवादिभिः तयाविधोपाधिरहितंकेवलंद्रव्यमिति
द्रव्यवादिभिःएकाप्यनेकैर्नामभिर्व्यवह्रियते योचोत्तरायामवस्थायांनिजैका
श्रयमायाख्यशक्तिकल्पितानेकोपाधिभेदभिन्नस्वरूपामाचक्षते विचक्षणाः
ययाचप्रकाशमय्यास्वाभिन्नतयाविश्वंप्रकाश्यते यस्यैवाविद्याशाश्वतिकवि
रोधापिनित्यसन्निहितापिद्रोग्धुंनशक्नोतियस्याश्चमहोदरेचरंभ्रमन्तेरवीन्दुविं
दुसंचयरवोदंचतिप्रपंचः यस्याःकिलार्चिःकणाङ्गारास्तारापतितरणितनूनपा
त्प्रभृतयः यस्याश्चबुद्धाविवमायाशक्तिनिशायामिवापगततमसिप्रभातायांसं
सारःस्वप्नइवसंलीयते सैवपराख्याशक्तिरनादिवासनापर्यायाविद्याख्यस्वश

 क्रिन्नोन्मेषमाणास्तन्नोच्छित्तेवयदाविमर्शोन्मुखिभवतितदापश्यंतीत्युच्यते साद्विती
 यावस्थाभण्यते यदापुनःसापश्यन्तीविमर्शदशास्वाश्रयाविद्याशक्तिपरिकल्पितस्व
स्यैवविव र्त्तभूतंमन्वानुस्यूतमनादिवासनानुकूलसमयानुरूपंस्वस्मादभिन्नमपि
भिन्नमिववविमृशंतीपदार्थजातमाभ्यंतरंवाह्यंचबुद्धिप्रतिभासलक्षणारागादिदु
ष्टतयांतःकरणस्यसंमुखंविमृशतीतिदामध्यमेत्याम्नायतेतृतीयावस्थामाहुः अ
स्यामेवावस्थायांपरायाःशक्तेर्योविमर्शांशःसवाचकःशब्दोभिधीयते यस्तुवि
मर्शांशःसवाच्योर्थइतिव्यपदिश्यते। यःपुनरेकात्म्यवभासःशब्दार्थयोर्वाच्य
वाचकभावाख्यःसंबंधोनिगद्यते ततश्चशब्दार्थसंबंधानामनादिसिद्धत्वं तथाचो
क्तं।सिद्धशब्दार्थसंबंधेचेतिसिद्धेशब्देर्थसंबंधेचेति एवंचकृत्वाविमर्शाख्यशब्दा

न्तु विश्वत्वाद्विमृश्यात्मप्रपंचप्रज्ञातप्रपंचस्य शब्दविवर्तत्वं सिद्धं भवति सैव यदा विम
र्शविमृश्योभयभावस्पर्शिनी ताल्वोष्ठादिस्थानविवर्तत्वादिकरणजनितैर्नादविशे
क्र रा॥३ षैः कृतसंस्कारां तां वृत्या क्रमवन्नादमयीव परिगृह्यते तदा वैखरीत्याम्नायविद्भिराम्नाय
ते चतुर्थीमवस्थां विदुः तदुक्तं वैखरी शब्दनिष्पत्तिर्मध्यमास्मृतिगोचरा द्योतमा
ना च पश्यंती सूक्ष्मा वागनपायिनीति अतः शब्दसृष्टौ बिंदुपूर्वं कलाद्यष्टकीर्णकानि
दर्शनेन बिंदुशिरस्कं नारकाद्यं बीजमुद्धृतं मकारांतस्यावद्योतकोमृतरूपश्चंद्रस्वरा श्रै ४
कारवान् बिंदुस्तद्योजनया प्रकाशानंदचिदात्मकं बीजमुद्धृतं भवतीत्यभिप्रायः मः शि
वः श्चंद्रमा वेधेति केशकाशः बिंदुपूर्वकमिति बिंदुग्रहणं कलानादयोरुपलक्षणं
ततश्च मंत्रबीजमस्तके नादबिंदुकलाः प्रदर्शयेत अतोर्थसृष्टिर्वीच्याशब्दसृष्टिक्र

ता॰ १३ वाचका तदुक्तं नसोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते अनुविद्धमिव ज्ञानं सर्वं श
ब्देन गृह्यत इति दीर्घानलप्लुतः अनुक्त्वा हिडुरहितं तदेव पुनरुद्धरेत मायन
म इति योजनायां षडक्षरं तारकस्वरूपमुक्तं भवति सबीजेन रामपदेन चंद्रायनम
इति योजनीयं तथा भद्रायनम इति एवं मंत्रत्रयं भवति नन्नु सर्वजिन रामपदेन चं
द्रभद्रपदस्य योजनया ष्टाक्षरमंत्रद्वयसामानाधिकरण्यान्मंत्रत्रयमपि तारकब्रह्म
विद्या स्यात न स्यात षडक्षरमंत्रराजस्यैव सर्वात्मकत्वप्रदर्शनात ब्रह्मादीनां
वाचकोयं मंत्रोऽन्वर्थादिसंज्ञितः सर्ववाच्यस्य वाचक इति श्रीरामपूर्वतापनीय
श्रुतिव्याख्यानावसरे सर्वात्मकत्वं व्याख्यातं सर्वेषां राममंत्राणां मंत्रराजः षड राम
क्षर इत्यगस्त्यसंहितायां च अतः सर्वेषां रामकाक्षरादीनां राममानुष्टुप मध्यानां रा १३

मसहस्राक्षरांतानांश्रीराममंत्राणांसर्वेषांगतोशारिचतुर्णांचसकलवेदानां
लोकानांचार्थवाचकत्वेनसर्वात्मकत्वातषडक्षरराममंत्रएवानेकप्रकाशकोस्तु
मालीवतारकब्रह्मस्वरूपेनान्यदिति ननुउक्तमंत्रद्वयात्मकमेवास्तुसहपठितत्वा
त् न सर्वमंत्राणामुपलक्षणार्थत्वेनोक्तेः नकेवलंसर्वप्रपंचकार्यभूतमेवतार
कं किंतुसकलकारणॐकारात्मकमपीत्याह इत्यामिति इत्युक्तप्रकारेषड
क्षरंतारकंॐॐकारात्मकंभवति नह्येतस्मादन्यॐकारोॐकारादितरन्यादित्य
र्थः एवंयस्मात्तस्मात ब्रह्मात्मकाःसच्चिदानंदाख्याइत्युपासितव्यं षडपिमं
त्रवर्णाब्रह्मात्मकाः ब्रह्मवाचकत्वाद्ब्रह्मस्वरूपाः सच्चिदानंदाख्याः सच्चिदानंद
रामावबोधकत्वाज्ञोणपाहृत्वात्तदाख्याः पंचवर्णानांसच्चिदानंदबीजाद्यत्वाद्वा

इतितारावयवतारकत्वस्मात्तराणामैक्यंसंपादनेनषडक्षरंतारकमेवोपासितव्यं
कृताधिकारिभिःसाधनचतुष्टयसंपन्नैर्मुमुक्षुभिःपरमहंसपरिव्राजकैरेतदेवार्थ
गुरुःसर्वजपेनोपासितव्यमित्यर्थः तदेवतारकयोरैक्यमाह अकारइत्यादिना अ
कारःप्रथमाक्षरोभवति अकारःप्रणवावयवःप्रथमाक्षरंराममंत्रस्यभवति लिंग
विपर्ययःछांदसः तथाउकारोद्वितीयाक्षरोभवति मकारस्तृतीयाक्षरोभवति अ
र्द्धमात्रश्चतुर्थाक्षरोभवति अर्द्धमात्रइत्यवयवत्वेनपुल्लिंगत्वं बिंदुःपंचमाक्षरो
भवति नादःषष्ठाक्षरोभवति सर्वार्थवाचकत्वात्तेषामपिषडवयवार्थवाचक
त्वमतिस्पष्टं एवमुभयोरेकार्थवाचकत्वेनसंख्यासामान्येनचतादात्म्यमनुभूयसर्वा
वस्थास्वेतदेवोपासितव्यंतारकस्यसिद्धादिदोषाभावः तारावयवानांमंत्राक्षरैरैक्य

नमंत्रगतसिद्धादिदोषनिरासादुत्तारकं ब्रह्म व्याचष्ट इति स्वयमेव श्रुतिरधिकारि
तारतम्यचिंतां स्वरितिसाक्षात्कारफलाद्यर्थं परिहरति एवं तारकत्वं सिद्धवत्कृत्य ता
रात्मकत्वात्सर्वसंसारभयतारणाद्वेति गूढाभिसंधाभिहितं पूर्वोक्तं हेतुद्वयं विवृ
णवती तारकनिर्वचनमाह तारकत्वात्तारको भवतीति तारकत्वाद्ब्रह्मात्मकत्वा
दयं मंत्रस्तारको भवति अतो मया यदुक्तं तद्देव ज्ञातव्यं नान्यदित्याह तदेव तारकं
ब्रह्म त्वं विद्धीति अन्यदन्यावृत्त्यर्थमवधारणं अनुध्यायानुबहून्शब्दान्वाचो ना ४
विग्लापनं हि तदिति विजानीयश्रवणनिषेधात् ज्ञात्वा च तद्देवोपास्यमित्याह तदे
वोपास्यमिति ज्ञेयमितितं देवं ज्ञेयमुपास्यमिति योजना अन्यन्मंत्रवाक्यनिचय
विचारणं विहाय तद्देव तारकमेवोपासितव्यमिति शिष्यशिक्षार्थमवधारणं एवं

ता. प्रथमहेतुंविविच्यद्वितीयमाह गर्भजन्मजरामरणसंसारमहद्भयात्संतारयतीति
१५ यस्मादेवंतस्मादुच्यतेतारकमिति किंतारकमितिप्रश्नस्योत्तरमुक्त्वाकिंतरतीत्य
स्याहस्याहयइत्याद्यांकंडिकांत यएतन्नारकंब्राह्मणोनित्यमधीतइति योब्राह्म
णास्तस्माद्ब्राह्मणःपांडित्यंनिर्विद्यबाल्येनतिष्ठासेदित्यादिश्रुत्युक्तोब्राह्मणः ब्र
ह्मबुभुत्सुरितियावत यएतन्नारकंनित्यमधीतेअर्थानुसंधानेनकेवलमपिवा
नित्यंजपतिसपाप्मानंतरति पाप्मानंतरति पाप्मानएवसन्नविशेषणान्याहसमृ
त्युंतरतिसभ्रूणहत्यांतरति२सब्रह्महत्यांतरति ३ स वीरहत्यांतरति ४ ससर्वंहृ
त्यांतरति ५ ससंसारंतरति ६ ससर्वंतरति ७ तारकब्रह्माध्ययनेनपाप्मानंतीर्त्वा राम
यत्प्राप्नोतितदाह सोविमुक्तमाश्रितोभवतीति अविमुक्तस्ययआत्मास्वरू १५

पंचयमेकंडिकोक्तंबिशुद्धब्रह्मणः अबिमुक्ताख्यकाश्यावास्वरूपंब्रह्मात्मैकंप्रतदे
वाश्रित्यावलंब्यतिष्ठति तारकब्रह्मोपासकस्यायंतैर्ब्रह्माश्रयणमेवभवतीतिभावः
तदुक्तंगीतासु अनिकेतस्थिरमतिरिति अबिमुक्तमाश्रिताभवतीतिपाठेनिरस्त
समस्तोपाधिकंब्रह्मात्मस्वरूपमविमुक्तशब्देनलक्षणयोच्यते तमाश्रितोभवतितद्
रूपोभवतीत्यर्थः समहान्भवतित्रैलोक्यपूज्योभवति सोमृतत्वंचगच्छतिनिरावरणं
कैवल्यमाप्नोति अविमुक्तात्माश्रितात्तत्वपदयोःजीवन्मुक्तिविदेहमुक्तिभेदे
नार्थभेदोज्ञातव्यः अस्यमंत्रस्यमहिमानंभगवान्भवानीवल्लभभवप्रियपरमा
त्माश्रीरामचंद्रएवजानातिनेतरः इतिशब्दःप्रश्नद्वयस्योत्तरद्वयसमाप्तौ प्रथम
कंडिकयानिर्दिष्टस्यतारकब्रह्मणास्मरणंतत्तरितयातारकैकेनतत्स्वरूपंप्रदर्श्यते

ता॰ १६ तीपयातस्यवाचकस्यवाच्यमर्थमभिनयन्वाच्यवाचकयोरैक्यंकृतातिशयत्वेनस्वय
मेवाहयाज्ञवल्क्यः ननुकिंतारकेकिंतरतीतिप्रश्नार्थनिरूपणेनोपक्षणात्वाद्वाक्य
स्यात्वाष्टमर्थकथनमकांडतांडवितमनुसरतिवक्ष्यमाणनामनेतत्वात न किंतार
कमितिप्रश्नस्यैवशेषावशिष्टत्वात नहिवाच्यमर्थमंतरेणवाचकस्यपर्यवसानंदृ
ष्टंश्रुतंवा अतस्तस्यैवार्थकथनमाहअथेति अथतारस्वरूपकथनानंतरं तद
र्थभूताएतेऽक्षतिप्रसिद्धवाक्यप्रमाणाश्चत्वारःश्लोकाभवंति अकाराक्षरसंभूतःसौ
मित्रिर्विश्वभावनः उकाराक्षरसंभूतःशत्रुघ्नस्तैजसात्मकः प्राज्ञात्मकस्तुभरतोमका
२२ राक्षरसंभवः अर्धमात्रात्मकोरामोब्रह्मानंदैकविग्रहः श्रीरामसांनिध्यवशाज्जगदा
नंददायिनी उत्पत्तिस्थितिसंहारकारिणीसर्वदेहिनां सासीताभगवतीज्ञेयामूलप्रकृति राम १६

यि१ अथेति४

संज्ञिता प्रवणत्वात्प्रकृतिरितिवदंतिब्रह्मवादिनइति अकारश्चासावक्षरंचतस्मा
संभूतः सम्यग्जातः अर्थरूपैः पश्चाद्भावित्वाहंकारेणावभासितः अकारवाच्य अकारा
र्थइतियावत सौमित्रिः सुमित्रासुतः विश्वभावनः जाग्रदवस्थायांविश्वंभावयतिसंक
ल्पयतीतितथा जाग्रदवस्थासाक्ष्यात्माविश्वइत्यर्थः तथोकारार्थमकारार्थार्द्धमात्रा
र्थास्वप्नसुषुप्तितुरीयसाक्षिणस्तैजसप्राज्ञानंदाः शत्रुघ्नभरतरामाज्ञातव्याः तत्रब्र
ह्मानंदैकविग्रहः ब्रह्मचासावानंदश्चसएवैकोविग्रहः शरीरंयस्यसतथा श्रीरामसं
निध्यवशात रामपदस्यश्रीपूर्वत्वंभक्त्यतिशयाभिधानार्थं रामसाक्षात्कारस्यैवपरम
पुरुषार्थतापनिः योवाएतदक्षरंगार्ग्यविदित्वाअस्माल्लोकात्प्रैतिसकृष्टं किंतेन
नकृतंपापंचोरेणात्मापहारिणा योन्यथासंतमात्मानमन्यथाप्रतिपद्यतइतिश्रु

ता० तिस्मृतिभ्यांपरमपुरुषार्थोप्रयत्नेविनिंदनश्रवणाच्च तस्यब्रह्मानंदविग्रहस्यश्रीरा
८ मस्यसान्निध्यंनामाश्रयः लौकिकमायावत्स्वाश्रयाव्यामोहकत्वेनस्वस्यचजडत्वे
नतदाश्रयणंतद्दर्शनंचनानुचितमतःसानिध्यवशाच्चिदाभासबललाभात जग
दानंदकारिणी जगतआनंदंसंकरोतीतितया उत्पत्तिस्थितिसंहारकारिणीसर्वे
देहिनो सर्वेषांदेहिनांआकारितानांतेषामुत्पत्त्यादिकारिणीयाचमूलप्रकृतिसंज्ञि
ता मूलप्रकृतिरविकृतिरित्युक्तनाम्नी सासीताभवतिज्ञेया सासीतेतिज्ञेयाभवति
प्रकृतिनिर्वचनमाह प्रणवत्वात्प्रकृतिरितिवदंतिब्रह्मवादिनइतीति एकस्तावित्य
स्यधातोःप्रणूयतेप्रस्तूयतेमहदाद्याकारनिर्माणेमायाप्रणवा तस्याभावस्तत्वं तस्मा राम
त्प्रणवत्वात प्रकर्षेणक्रियतेजनयेतिप्रकृतिः ब्रह्मप्रणवमूलोवेदस्तद्वचनशीला ८

ग।४

वद्विचारपरा वदंति कथयंति मायाव्यक्तं प्रकृतिः सीतेति पर्यायाः तथा च श्रीरामा
यणे रामं प्रति कौसल्योक्तिमुपनिबंधादिकविर्भगवान्वाल्मीकिः संक्षिप्य हि पुरा ह्येका
नेकत्वं मायया सह मायाभार्य यास्तु मया दिव्या मां त्वं पूर्वमसृजन इति जाग्रत्स्वप्न
सुषुप्तितुरीयसाक्षित्वेनोक्तविश्वतैजसप्राज्ञेश्वरसौमित्रिशत्रुघ्नभरतरामास्तेषा
मेकत्वेप्यनेकत्वकर्त्री सा सीता चेत्येतावानेव स्थूलसूक्ष्मसर्वप्रपंचः ॐकारात्मक
स्य तारकब्रह्मणोऽर्थ इत्युपसंहृतावितिशब्दः नन्वकाराद्यक्षरसंभूत इत्यादिना ॐका
रस्यैवार्थः प्रदर्शितो न तु षडक्षरतारकस्येति चेन्न तारतारकयोरभेदप्रदर्शनात् पूर्वमों
कारात्मकत्वेन षडक्षरं तारकं ब्रह्म प्राधान्येनोपासितव्यमित्युक्तमिदानीं तारकष
डक्षरात्मकत्वेनोंकारप्राधान्येनोच्यते तत्र ब्रह्मचर्यगृहवनस्थाभिप्रायश्चाद्यः

ता॰ १८ प्रकारः द्वितीयश्चचतुर्थाश्रमाभिप्रायेण इदानीमोंकारोपासनयाक्रमेणमुक्तिप्र
कारमाहुः ॐमित्येतदक्षरंसर्वमित्यादिनायावत्खंडिकासमाप्ति ॐमित्येतदक्षरंस
र्वमिति सर्ववाच्यमर्थजातंॐमित्येतदक्षरं ॐकाररूपमेवाक्षरंअक्षररूपश्रीरामप
रमार्थप्रदत्वादक्षरं सर्ववागात्मके ॐकारेभावाभावात्मकसर्वार्थवाच्यवाचकत्वं
नामसमंजसमितिभावः वाग्वाॐकारइति शंकुनासर्वाणिपर्णानिसंतृण्णान्येव
मोंकारेणसर्वावाक्संतृण्णेतिच ॐकारोवैसर्वावागित्यादिश्रुतिभिरोंकारस्यस
र्ववागात्मकत्वमभिधीयते ॐकारेणावभास्यमानत्वात्सर्वमोंकारात्मकमेवेतिज्ञाते
सतिकथंपरमार्थावाप्तिरित्यतआह तस्योपव्याख्यानमिति तस्यपरमार्थप्रकाश
कॐकारस्य उप अक्षररूपश्रीरामप्रतिपत्त्युपायात्वादक्षररूपश्रीरामसामीप्येन राम १८

व्याख्यानेविस्पष्टंप्रकटकथनंजानीयादितिशेषः कथमित्यतआह भूतंभव्यंभवि
ष्यदिति सर्वमोंकारएवेति कालत्रयपरिच्छिन्नंसमष्टिव्यष्ट्यात्मकंविराट्हिरण्य
गर्भरूपमोंकारएवेतितर्हिकालत्रयातिक्रान्तस्योंकारात्मकत्वंनस्यादित्यतआह
यच्चान्यत्त्रिकालातीतंतदप्योंकारएवेति यच्चान्यत्त्रिकालातीतंकार्यैकसमधि
गम्यंकालत्रयानाकलितमव्याकृतादितदप्योंकारएवएवंकार्यकारणरूपस्यस
र्वप्रपंचस्यवाच्यस्यवाचकत्वमोंकारेप्रदर्शितमिदानींवाच्यवाचकयोर्भेदात्परमा
र्थरूपश्रीरामावाप्तिर्नस्यादित्यतस्तयोरभेदंदर्शयति सर्वंह्येतद्ब्रह्मेति सर्वेकार्यका
रणात्मकंवाच्यं वाचकमोंकारंपरादिवाक्चतुष्टयरूपंपरमार्थभूतश्रीरामावभास
कमहत्त्वंच हियस्मादित्यर्थःएतत्उकारीत्यानामरूपात्मकंशब्दस्पृष्ट्यर्थसृष्टिक्रमेपूर्व

ना·उ
१८

प्रदर्शिते ब्रह्मशुद्धश्रीरामाख्यब्रह्मण्यारोपितंवाचारंभणं विकारो नामधेयं श्रुतिके
त्येवसत्यमितिश्रुतेः ननुसर्वंह्येतत्तद्ब्रह्मेत्यत्रसर्वं खल्विदंब्रह्मेत्यत्रचसर्वात्मकंब्रह्मो
च्यते तत्किंसर्वंब्रह्मेतिसर्वमनूद्यब्रह्मात्मकत्वाविधिरथवाब्रह्मानूद्यसर्वात्मकत्वा
विधिः नप्रथमः मिथ्यात्वेनाभिमतस्यसर्वस्यब्रह्मात्मतायाममिथ्यात्वापत्तेःसर्व
स्य नहिब्रह्ममिथ्या नद्वितीयः ब्रह्मणोमिथ्यात्वापत्तेः नहिमिथ्याभूतात्सर्वस्मा
दभिन्नममिथ्याभवितुमर्हति अत्रोच्यते सर्वमनूद्यतस्यब्रह्मात्मताविधीयते नचब्रह्मा त्मव
त्मतायांसर्वस्यसत्यत्वापत्तिर्दोषाय सर्वस्यापिब्रह्मात्मनासत्यत्वस्येष्टत्वात तर्हि
प्रपंचोमिथ्येतिवाचोयुक्तिरयुक्तास्यादितिचेत न स्वरूपेणमिथ्यात्वस्यब्रह्मरूपेण राम
सत्यभूतत्वेप्यप्रत्यूहत्वात नहिस्वरूपेणामिथ्याभूतमपिरजतंशुक्तिरूपेणापिमिथ्या १८

ॐ

भवति ननु तर्हि स्वर्णकुंडलमित्यत्रापि किं न चिद्रूपेणासत्यत्वं केन चिद्रूपेणामिथ्यात्वमाप
द्येतेति चेत् मैवं वैषम्यात् तत्र हि स्वर्णकुंडलांशयोरन्यतरस्यापि बाधाभावाद्भिन्नैव बाध
सामानाधिकरण्यप्रयोगात् सर्वं ब्रह्मेत्यत्र च सर्वस्य स्वरूपतो बाध्यत्वाद्बाधसामानाधि
करण्यप्रयोगान्नुपपत्तिः चोरः स्थाणुरितिवत् एतदेव श्रीरामपूर्वतापनीयश्रीवत्वेनेद
श५ मंशस्यित्यत्र विवृतं कृतं नन्वात्मनोऽव्यतिरेकेण केवलस्वरूपनिरूपणेन परोक्षेणाक
थं परमार्थभूतरामावाप्तिः नहि तेजो दहतीति कथया पाकनिष्पत्तिर्दृष्टा यावत्तन्मणी
नस्फुरत्यतो गुडजिह्विकान्यायेन परमार्थोपपत्तिमाह अयमात्मा ब्रह्मेति पूर्वोक्तहेत
रर्थात् द्रष्टव्यः हि यस्मात् सर्वं ब्रह्म तस्मात् अयं अयमहमस्मीत्यनुभवगोचर आत्मापि
ब्रह्म नहि सर्वस्माद्भिन्नत्वेन विच्छेद्य मौंजीषीकावत् स्थयक्रियते स्वात्मा नन्वात्मनः

ष्ट

ता॰उ प्रत्यगात्मत्वेनसर्वस्यद्रष्टृत्वेनचसर्वस्मात्पार्थक्यात्त्वमात्मनःसर्वश्रुतिस्मृतिपुराणेति
२० हासादिष्ववगम्यतएव सत्यंतत्किंनवानेनोच्यतेव्यवहारमवलंब्यप्रथमतआत्मनोब्र
ह्मत्वंदर्शयितुंसर्वांतःपातित्वमुक्तं स्वरूपेणसर्वस्मातिरिक्तआत्मत्विदानींनिरूप्य
तेअतोनदोषावकाशःननुपूर्णत्वातब्रह्मणःआत्माव्यतिरिक्तेयस्मिन्कस्मिंश्चिद्विशे
षेब्रह्मसाक्षात्कारोदयप्रत्वेनालंकिमित्यात्मन्येवेत्याग्रहः नायमाग्रहः तत्रैवन्याय्य
त्वात अहमज्ञइत्यनुभवसिद्धात्मन्यज्ञानाध्यासनिरासप्रयत्निस्येवप्राशस्त्यं नहिदे
वदत्तेऽध्यासनिरासाययज्ञदत्तेजनप्रयोगः अतआत्मनोऽध्यस्ताज्ञाननिरासअध्यासाधि
ष्ठानविकासश्चेत्कृभयमभयंभवतीतिभावः भवत्वयमात्माब्रह्मतथापिब्रह्मापरोक्ष
त्वंकथमागतमितिचेत उच्यते अयमस्मीत्यनुभवादपरोक्षआत्मैव तदुक्तंभट्टपादैः॥ २०

दमः प्रत्यक्षगतेः समीपवर्त्तिचैतन्यरूपं अदस्सक्षविप्रकृष्टं तदिति परोक्षं विज्ञानीयादिति
यदि परोक्षः स्यात्तदात्मत्वात्तस्य जडत्वेन प्रकाशानुपपत्तौ जगदांध्यं प्रसज्येत अथ वैसेयं बाधल
ग्नस्य बिनिपातः पदे पदे इति न्यायात् अत्र तत्रात्मनो ब्रह्मत्वं ब्रह्मणोऽपि पारोक्ष्यनिवृत्त्यापरो
क्षावाप्तिर्निरायासत एवेत्यभिप्रायः यद्यपि देहत्वात्तद्देहगतत्वाद्वा ब्रह्मेति ब्रह्मपदार्थज्ञा
नमसंभाव्यमस्मीत्यात्मज्ञानमप्यपेक्षितं याप्यात्मैव ब्रह्मेति ज्ञापयति शास्त्रं तदेवं ब्रह्मात्मैक्यं
परमार्थश्रीरामावाप्तिरित्युक्तं भवति अयमात्मा ब्रह्मेत्यनेन महावाक्येनोक्तमर्थं द्रढयितु
मध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यते इति न्यायेन त्वंपदार्थं तत्पदार्थयोः रूपास्योपासकयोरा
रोपापवादद्वारा खंडैकरसशुद्धब्रह्मावाप्तिमाह सोऽयमात्मा चतुःपादिति। सः पूर्वोक्तः अ
यमात्मा परावरत्वेन व्यवस्थितः चतुष्पाच्चतुश्चरणः कार्षापणवत् न गोरिव चतुष्पात् य

२१ यथा हि कार्षापणस्ह विज्ञेयः कार्षिकसंज्ञो त्रिकः पण इति मनूक्त्या कर्षेण पलचतुर्थांशेनोन्मि
तस्ताम्रविकारः माषषोडशात्मकः सच पूर्वपूर्वपादानामुत्तरोत्तरमेलनेनैव कार्षापणसंख्या
संज्ञां लभते नान्यथा तथात्र पादानां विश्वादीनां पूर्वपूर्वप्रविलापनेन तुरीयस्य प्रतिपत्तिरि
मपि तत्करणसाधनः पादशब्दः। कथं चतुःपादत्वमित्यत आह जागरितस्थान इत्यादिना च
तुर्थमित्यन्तेन जागरितस्थानः जागरितं स्थानमस्येति जागरितस्थानः। बहिःप्रज्ञः
स्वात्मव्यतिरिक्ते विषये प्रज्ञा यस्य स बहिःप्रज्ञः बहिर्विषयेव यस्य प्रज्ञा अविद्याकृतावभास इ
त्यर्थः सप्तांगः सप्त मस्तकादीन्यंगान्यस्य स तथा तान्येवोक्तानि वार्त्तिकेऽङ्गिः शिरस्त्वह्न
र्मुखं च प्राणो मध्यं च वह्निस्ततोऽप्यधः इत्येतान्सप्तकं वैश्वानरापास्मिश्रुतौ स्मृतमिति तानि राम २१
कानीत्यपेक्ष्यते द्यौर्मूर्द्धा चक्षुरादित्यः अग्निर्मुखं प्राणो वायुः देहमध्यमाकाशः वस्निः समु

दः पृथिवीपादाविति सप्तस्वलोकेषु शिरआदीनिअङ्गान्यस्येति वा एकोनविंशतिमुखः
पंचज्ञानेंद्रियाणि पंचकर्मेंद्रियाणि पंच प्राणाः चत्वार्यंतःकरणान्येव एकोनविंशतिसाधि
देवतानि नामरूपाश्रयक्रियासाराणि मुखान्युपलब्धिस्थानान्यस्येत्येकोनविंशतिमुखः
श्रीनृसिंहपूर्वतापनीये प्रणवमंगं जानीयादिति श्रुत्या मंत्रराजांगत्वमोंकारस्याभिहितं
तथैव श्रीमच्छंकराचार्यैर्व्याख्यातं नृसिंहोत्तरतापनीये तदेवाहुर्वै प्रजापतिमब्रुवन्त्वरणीया
समिममात्मात्मानमोंकारेणो व्याचक्ष्वेत्यनया श्रुत्या प्राधान्यमेवोंकारस्याभिहितं मांडूक्यो
पनिषदि प्रणवविद्यायास्वाधीनत्वेन प्राधान्यमोंकारस्योक्तं तथा श्रीरामपूर्वतापनीये
जीवत्वेनेदमोंशस्येत्यनया श्रुत्या श्रीतारकषडक्षरमंत्रराजस्य पूर्वांगत्वेनोत्तरांगत्वेन वा
ॐकारोपासना निरूपिता। अत्र श्रीरामोत्तरतापनीये प्राधान्यं वा अत्र प्रधान्यं वा प्राधान्य

डः पृथिवीपाद इति सप्तस्वलोकेषु शिरआदीनि अङ्गान्यस्येति वा एकोनविंशतिमुखः
पंचज्ञानेंद्रियाणि पंचकर्मेंद्रियाणि पंचप्राणाः चत्वार्यंतःकरणान्येव एकोनविंशतिसाधि
दैवतानि नामरूपाश्रयक्रियासाराणि मुखान्युपलब्धिस्थानान्यस्येत्येकोनविंशतिमुखः
श्रीनृसिंहपूर्वतापनीये प्रणवमंगं जानीयादिति श्रुत्या मंत्रराजांगत्वमोंकारस्याभिहितं
तथैव श्रीमच्छंकराचार्यैर्व्याख्यातं नृसिंहोत्तरतापनीये तदेवा ह वै प्रजापतिमब्रूवन्नणोरणीयां
समिममात्मानमोंकारं नो व्याचक्ष्वेत्यनया श्रुत्या प्राधान्यमेवोंकारस्याभिहितं मांडूक्यो
पनिषदि प्रणवविद्यायाः स्वाधीनत्वेन प्राधान्यमोंकारस्योक्तं तथा श्रीरामपूर्वतापनीये
जीवत्वेनेदमोंशस्येत्यनया श्रुत्या श्रीतारकषडक्षरमंत्रराजस्य पूर्वांगत्वेनोत्तरांगत्वेन वा
ॐकारोपासना निरूपिता। अत्र श्रीरामोत्तरतापनीये प्राधान्यं वा अत्र प्रधान्यं वा प्राधान्य

ता प्राधान्यंवा अप्राधान्यंवा नतयोरुच्यते किंत्वोंकारएवषड्स्वरंतारकंब्रह्मेत्युच्यते अतो
२२ व्याख्याभेदेपाठभेदेचसूत्रनातिरिक्तत्वेचछांदोग्यपात ओंकारोपासनाभेदेचान्यथाप्रति
पत्तिर्नमंतव्या तथास्थूलभुक्स्थूलान्विषयान्प्राश्नन्येनस्वात्मसात्करोतीतिस्थूलभुक्
वैश्वानरः विश्वेषांनराणांनयनाद्वैश्वानरः स्थानादिपंचविशेषणविशिष्टो विराडकारार्थ
इतियावत सप्तांगवैश्वानरपदप्रयोगस्तुसमष्टिव्यष्ट्यात्मनोरेकत्वप्रदर्शनार्थमन्यथा
ष्टांगः विश्वस्येतिवक्तव्यमग्रेतैजसादीनामुक्तत्वान्नहि द्वितीयतृतीयपादयोर्हिरण्यगर्भा
व्याकृतयोरनुक्तत्वात्समष्टिव्यष्टैक्याभंगप्रसंगइतिचेत यथाप्रथमपादेवैश्वानरः विश्वै २२
क्यप्रदर्शनार्थमुक्तस्तथैवाग्रिमपादद्वयेतैजसप्राज्ञौहिरण्यगर्भाव्याकृतैक्यप्रदर्शनपरावित्यव
सेयं प्रथमपदः एतत्सर्वेकोत्तरपादाधिगमात्प्राथम्यं। द्वितीयमाह स्वप्नस्थानः स्वप्नस्था राम

नमस्यतेजसस्येतिस्वप्नस्थानः अंतःप्रज्ञः जाग्रत्प्रज्ञानेकसाधनावहिर्विषयेष्ववभा
समानामनसिस्पंदमानासतीतंतथाभूतंसंस्कारंमनस्याधत्ते तन्मनस्तथासंस्कृतंवि
त्रपटइवबाह्यसाधनानपेक्षाविद्याकर्मभ्यांप्रेर्यमाणंजाग्रद्वद्भवति तथाचबृहदारण्य
केअस्यलोकस्यसर्वावतोमात्रामुपादायेत्यादिश्रुत्योक्तं मनस्येकीभवतीतिप्रस्तुत्यए
षोदेवःस्वप्नेमहिमानमनुभवतीत्याथर्वणे इंद्रियापेक्षयांतःस्थत्वान्मनसःतद्वास
नानुरूपांतद्बुद्धिप्रज्ञेतोतःप्रज्ञः। सप्तांगएकोनविंशतिमुखः इत्यंगमुखयोरुक्तन्याये
नवासनानुरूपमेवात्रबोद्धव्यं। स्वप्नेवासनामय्याःप्रतीयमानत्वात् प्रविविक्तभुक्
प्रकर्षेणविविक्तातःकेवलंवासनामयानुभोगाननुभुनक्तीतिप्रविविक्तभुक् तैजसः
जाग्रत्स्थूलप्रपंचात्स्वतेजसागच्छतीतितैजसः उकारार्थः द्वितीयपादः त्रिष्वपिस्थानेषुतत्वा

उ·ता· प्रतिबोधलक्षणायास्यस्वापस्यतुल्यत्वादतःपूर्वाभ्यांसुषुप्तंविभजतेतृतीयपादकथनार्थं
२३ यत्रसुप्तोनकंचनकामंकामयतेनकंचनस्वप्नंपश्यतितत्सुषुप्तमितियत्रयस्यामवस्थायां
सुप्तोनिद्रितःपुमान्कंचनकिमपिकामंविषयंनकामयतेआसक्त्याबुध्यानाभिलषतिनकं
चनस्वप्नंपश्यतिकिमपिवासनामयभोगंनानुसंधत्तेतत्सुषुप्तं सासुषुप्तावस्था तृतीय
पादमाह सुषुप्तस्थानइत्यादिना सुषुप्तस्थानः उक्तोसुषुप्तंस्थानस्यातिसतथा असत्का
र्यवादस्याप्युक्तत्वाद्विद्यमानमथचसप्तांगत्वमेकोनविंशतिमुखत्वंचसन्मात्रात्पृथ
ग्विभाव्यतइत्याह एकीभूतइतिकिमात्मकोसावेकीभावइत्याकांक्षायांसन्मात्ररूपःप्रज्ञा
नात्मकइत्याह प्रज्ञानघनएवेति जाग्रत्स्वप्नज्ञान घनत्वात्त्रिविडत्वात्सर्वरसानामिव राम
सैंधवखिल्यप्रज्ञानघनः एवकारेणजात्यंतरप्रतिषेधःअतएवैकत्वेनविशेषविज्ञानभा २३

वात आनंदमयः आनंदप्रायः दुःखबीजस्य विद्यमानत्वादानंद एवेति वक्तुं न युक्तं अ
नेन सुषुप्तिरानंदाभासस्य ग्रांतर्मुखसन्मात्ररूपब्रह्मज्ञानात्मकसामान्यशरीरप्रवेशोपायः
प्रदर्शितः विश्वतैजसयोरिवास्यापि भोग्यमाह स्वात्मानंदभुगिति तथात्र स्वाभाविकपर
मानंदभोगउपपन्नः अतिशयेनानंदं भुनक्तीति तथा यथा हि लोके निरीहः स्थितः सुखा
नंदभुगुच्यते तथात्र स्वाभाविकपरमानंदभोगउपपन्नः केन कारणेनानंदभोगपत्वमि
त्यत आह चेतोमुख इति चेतः स्वप्नजाग्रत्प्रज्ञाकारणत्वादित्याह इत्याभासांतरं चेतोमुख
इति चेतश्चित्प्रतिबिंबसहिताविद्यावृत्तिस्तया सुखं करणं यस्य सः चेतोमुखः आनंदमयः आ
त्मानंदभुक् चेतोमुख इति त्रिभिः पदैर्भोक्तृ भोगपकरणान्युच्यंते स्वप्नादिप्रतिबोधे चेतः
प्रतिद्वारीभूतत्वान्नथा बोधलक्षणं वा चेतोमुखं द्वारमस्य स्वप्नाद्यागमनं प्रतीति चेतो

नमस्यतेजसस्येतिस्वप्नस्थानः अंतःप्रज्ञः जाग्रत्प्रज्ञानेकसाधनाबहिर्विषयेष्ववभा
समानामनसिस्पंदमानासतीतंतथाभूतंसंस्कारंमनस्याधत्ते तन्मनस्तथासंस्कृतंविचि
त्रपटइवबाह्यसाधनानपेक्षाविद्याकर्मभिःप्रेर्यमाणंजाग्रद्वद्भवति तथाचबृहदारण्य
केअस्यलोकस्यसर्वावतोमात्रामुपादायेत्यादिश्रुत्योक्तं मनस्येकीभवतीतिप्रस्तुत्यए
षदेवःस्वप्नेमहिमानमनुभवतीत्याथर्वणे इंद्रियापेक्षयांतःस्थत्वान्मनसःतद्वास
नानुरूपांतद्बुद्धिप्रज्ञोंतःप्रज्ञः। सप्तांगएकोनविंशतिमुखःइत्यंगमुखयोरुक्तान्याये
नवासनानुरूपमेवात्रबोद्धव्यं। स्वप्नेवासनामययोःप्रतीयमानत्वात् प्रविविक्तभुक्
प्रकर्षेणविविक्ताततःकेवलवासनामयान्भोगाननुभुनक्तीतिप्रविविक्तभुक् तैजसः
जाग्रत्सुषुप्त्योःस्वतेजसागच्छतीतितैजसः उकारार्थः द्वितीयपादः त्रिष्वपिस्थानेषुतत्वा

उ.ता. प्रतिबोधलक्षणास्य स्वापस्य तुल्यत्वादतः शर्वाभ्यां सुषुप्तं विभजते तृतीयपादकथनार्थं
२३ यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तमिति यत्र यस्यामवस्थायां
सुप्तो निद्रितः पुमान् कंचन किमपि कामं विषयं न कामयते आसक्तबुध्याभिलषति न कं
चन स्वप्नं पश्यति किमपि वासनामयभोगं नानुसंधत्ते तत्सुषुप्तं सा सुषुप्तावस्था तृतीय
पादमाह सुषुप्तस्थान इत्यादिना सुषुप्तस्थानः उक्तं सुषुप्तं स्थानस्यातिस तथा असत्का
र्यवादस्याप्युक्तत्वाद्विद्यमानमथ त्रसप्तांगत्वमेकोनविंशतिमुखत्वं च सन्मात्रान्न पृथ
ग्विभाव्यत इत्याह एकीभूत इति किमात्मकोसावेकीभाव इत्याकांक्षायां सन्मात्ररूपः प्रज्ञा
नात्मक इत्याह प्रज्ञानघन एवेति जाग्रत्स्वप्नज्ञान घनत्वात्त्रिविडत्वात्सर्वरसानामिव राम
सैंधवखिल्यप्रज्ञानघनः एवकारेण जात्यंतरप्रतिषेधः अत एवैकत्वेन विशेषविज्ञानभा २३

ता·

मुखः अविद्यावृत्यवच्छिन्नं चैतन्यं भोगसाधनमिति वार्त्तिके भूतभविष्यज्ञानत्वात्सर्ववि
षयज्ञानत्वमस्येवेत्याह प्राज्ञेति सुप्तो हि भूतपूर्वगत्या प्राज्ञ उच्यते अथवा प्रज्ञप्तिमात्रम
स्येवासाधारणरूपमिति प्राज्ञः इतरयोर्विशिष्टमेवज्ञानमस्ति सोयं प्राज्ञो मकारार्थः
स्तृतीयपादः असावेव सर्वस्य कारणमित्याह एष सर्वेश्वर इत्यादिना एष सर्वेश्वरः
एष प्राज्ञ आत्मा स्वरूपावस्थः अयमेव हि सर्वस्येश्वरः यद्यपि प्राज्ञस्यापि सर्वेश्वरत्वा
दिधर्मजातं युज्यते तथापि सापेक्षत्वेन सबीजत्वेन च निरस्यते तुरीयस्य तु निरपेक्षत्वा
न्निर्बीजत्वात्सर्वेश्वरत्वादिधर्मजातं संगच्छत इति भावः सर्वेश्वरत्वे हेतुमाह एष सर्व
ज्ञेति अयमेव हि सर्वावस्थाभेदज्ञाता सर्वेश्वरत्वेप्यांतर[illegible]श्वरत्वं न स्यादित्यत आ
ह एषोंतर्यामीति स्वयमंतरनुप्रवेश्य सर्वेषां भूतानां नियंता बाह्याभ्यंतरनियंतृत्वे हे राम २४

वात् आनंदमयः आनंदप्रायः दुःखवीजस्य विद्यमानत्वादानंद एवेत्यवक्तुं न युक्तं अ
नेनसत्त्विरानंदाभासस्य प्रांतर्मुखसन्मात्ररूपब्रह्मज्ञानात्मकसामान्यशरीरप्रवेशोपायः
प्रदर्शितः विश्वतेजसयोरिवास्यापि भोग्यमाह आत्मानंदभुगिति तथात्रस्वाभाविकपर
मानंदभोगउपपन्नः अतिशयेनानंदंभुनक्तीतितथा यथाहिलोकेनिरीहः स्थितः सुखा
नंदभुगुच्यते तथात्रस्वाभाविकपरमानंदभोगउपपन्नः केनकारणेनानंदभोग्यत्वमि
त्यतआहचेतोमुखइति चेतःस्वप्नजाग्रत्प्रज्ञाकारणत्वाच्चित्ताहंकृत्याभासांतरं चेतोमुख
इतिचेतश्चित्सत्तिबिंबसहिताविद्यावृत्तयो मुखंकरणं यस्य सचेतोमुखः आनंदमयः आ
त्मानंदभुक्चेतोमुखइतित्रिभिःपदैर्भोक्तृभोग्यकरणान्युच्यंते स्वप्नादिप्रतिबोधेचेतः
प्रतिद्वारीभूतत्वात्तथा बोधलक्षणं वा चेतोमुखंद्वारमस्य स्वप्नाद्यागमनंप्रतीतिचेतो

त्वमाह एषयोनिःसर्वस्येति योयस्यकारणंसतस्यनियंताभवति सर्वस्ययोनित्वेहेतु
माह प्रभवाप्ययौहिभूतानामिति हियस्माद्भूतानामयमेवप्रभवाप्ययौउत्पत्तिप्रलयौकृ
तवान् तस्मात्सर्वयोनिः प्रथमद्वितीयपादस्थानादिनिपंचपंचविशेषणानिनिरूपि
तानितृतीयेषट्चतुर्थेपंचविशेषणैरीश्वरत्वंप्रदर्शितं तदीश्वरत्वादिकंमायामात्रं
विहायशुद्धंस्वरूपमात्मनःपंचदशविशेषणैर्विशिष्टंशिवंचतुर्थंपादमाह नवहिः
प्रज्ञमिति वहिर्विषयव्यापारोपरमाद्विश्वसाक्षिणोजाग्रदवस्थाप्रतिषिध्यते तर्हि
मनोव्यापारस्यदुर्वारत्वादंतःप्रज्ञत्वंप्रसक्तंतमाभूदित्याह नांतःप्रज्ञमिति अनेन
तैजससाक्षिणःस्वप्नावस्थानिषिध्यते उभयत्रव्यापारप्रतिषेधेनतदंतरालव्यापारे
प्राप्तेतन्निषेधति नोभयतःप्रज्ञमितिजाग्रत्स्वप्नांतरालेमनोव्याप्रियतेप्रज्ञार्थंनकुर्यादि

मा०उ० २५ त्पर्थः अंतरालेप्रतिषेधेनोभयत्रयुगपत्प्रज्ञार्थव्यापारेप्राप्तेतन्निषेधति नप्रज्ञमि
ति एवंसर्वतोमनोव्यापारप्रतिषेधाद्यथाप्राप्तं मनोविद्यात्मकंसमवतिष्ठति। तत्स्थितिं
प्रतिषेधतिनाप्रज्ञमिति तत्रस्थितिप्रतिषेधाद्ज्ञानसाक्षिकेस्वप्नेप्राप्तेतन्निषेधति
नप्रज्ञानघनमितिएभिःषड्भिःपदैःप्रतिषेधभूतैः उपास्यप्रतिकूलंप्रतिषिध्ययस्मि
न्नुपास्येमनोव्यापृतंकार्यंतदुपास्यंनिर्दिशतिनवभिःपदैः अदृष्टमितिदृष्टविषय
त्वाद्दर्शनायोग्यंयस्येंद्रियस्ययोविषयस्तेनैवसज्ञाप्यते नान्येनेतिनियमात अतएव
अव्यवहार्यं अतएवअग्राह्यं अतएवालक्षणं लक्षणंलिंगंनविद्यतेतदलक्षणं
अतएवाचिंत्यं अनुमानेनतर्केणवा अतएवाव्यपदेश्यं नियतोंकारोपास्यप्रति राम
पादकैःशब्दैः अतएवएकात्मप्रत्ययसारं एकस्मिन्सर्वेषामात्मनांप्रत्ययःएका २५

त्मप्रत्ययः स एव सारं यस्य तत्तथोक्तं यद्वा एक एवात्मा उपास्योपासकयोरिति वा प्रत्ययः
शेषं पूर्ववत् अत एव प्रपंचोपशमं प्रागुक्तन्यायेन मनसो हि बाह्यदर्शनस्मरणव्यापाराभा
वाद्याहृतत्वाच्च व्यापाराभावाच्च उपास्यव्यतिरेकेण प्रपंचाप्रतीतेः प्रपंचोपशममिति शिवं
शंकरं कथंभूतं अद्वैतं सजातीयविजातीयस्वगतभेदरहितं अर्द्धमात्रेनादात्मकं चतुर्थं तुरी
यं पादं पारं मन्यन्ते जाग्रदादिनिरूपणं आचार्योक्तमेवोच्यते जाग्रत्सत्वगुणाशोक्ता केवले
शक्तिरूपिणी मरणं विस्मृति मूर्छां निद्रा च तमसावृता स्वप्ने सकलाज्ञेया सुषुप्तिः शि
वरूपिणी संयोगः सत्वतमसोः रज इत्यभिधीयते सुषुप्ते जागरादौ स्वप्नावस्था रजोमयी
सुषुप्त्यादौ जागरान्ते स्फुरन्नाममात्रलक्षणा अवस्था शेषता प्राप्ता तुर्या तु परमा कला चू
तरंभादिफलवत्पाकांते कैवल्यदायिनी। तथा च कार्त्तिके बिंदुहिरण्यगर्भस्य कारणं

उ.भा चेत्तु पाधयः इशस्यपत्रिभिर्हीनं तुरीयं तत्परं विदुरिति ४ एतद्वोपास्यं रामाख्यं ब्रह्म यत्पगा
त्मतया उपास्यमित्याह स आत्मा विज्ञेय इति स उपास्य आत्मा श्रीरामः प्रत्यगात्मनि एवं वि
ज्ञेयो द्रष्टव्यः आत्मन्येवात्मानं पश्येदिति श्रुत्यंतरात् कथंभूतो विज्ञेय इत्यत आह सदोज्वल
इत्यादि सप्तविशेषणानि सदोज्वलः हृत्पलिप्तः अविद्यातत्कार्यहीनः स्वरूपास्फूर्तिदुः
खाद्युद्भवरहितः आत्मबंधहरः स्वरूपप्रतिबंधरहितः सर्वदाद्वैतरहितः द्वैतस्फुरण
शून्यः आनंदरूपः आनंदगुणवान्नभवति सर्वाधिष्ठानसन्मात्रः सर्वस्याधिष्ठानं चा
सौ सन्मात्रश्च निरस्ताविद्यातमोमोहः मायामायाभासश्चेति मायाविद्येत्युच्यते अवि
द्यातत्कार्यराहित्यं प्रथमतः मायामायाकार्यराहित्यं पश्चाद्राहित्यं पौनरुक्त्यं पूर्वपूर्वस्योत्तरो राम
त्तरं प्रति हेतुहेतुमद्भावः एवं सप्तविशेषणविशिष्ट आत्मा विज्ञेय इत्युक्तं स कथं विज्ञेय इ २६

त्यत आह अहमेवेति संभाव्येति उक्तः आत्मा त्वहमेवेति सम्यक्भावयित्वा सम्यक्पदेनो
क्तो भावनां तत्त्वमसी त्वं तदसीति वा परस्परव्याप्त्यैवानुदर्शयति अहमोंतत्सद्यत्परं ब्रह्म रा
मचंद्रश्चिदात्मकः सोहमोंतद्रामभद्रः परंज्योतीरसोहमित्यात्मानमादाय मनसा ब्र
ह्मणैकीकुर्यादिति ओमित्युच्चरन् अहं उक्तस्वरूप आत्मा ततव्यापकं सततसन्मा
त्रपत्त्वसिद्धं परंब्रह्म वाङ्मनोगोचरं तत्किमित्यपेक्षायामाह रामचंद्रश्चिदात्मक
इति अनेन ब्रह्मणः परोक्षत्वनिवृत्त्यर्थमहं ब्रह्मास्मीत्युक्तं भवति एवं च सति प्राणाम
शनापिपासादिधर्मसत्त्वं वारयितुं पुनः ओमित्युच्चरन् सः अहं तच्छब्दपरामृष्टमर्थं पू
र्वोक्तमनुवदति तद्रामभद्रः परंज्योतीरस इति तद्रामादिविशेषणत्रयविशिष्टः रामभद्रः
परंज्योतीरसः परमज्योतिसारः अहं आत्मा अनेन ब्रह्माहमस्मीत्युक्तं भवति एवं च

उ.ता सतिअशनापिपासाद्यपरोक्षनिवृत्तिः स्वतःसिद्धेवब्रह्मणाअशनादिराहित्यात अश
नापिपासेशोकंमोहंजरामृत्युमत्येतीतिश्रुतेः उक्तमर्थंउपसंहरतिइत्यात्मानमा
दायमनस्याब्रह्मणेकीकुर्यादितिइत्युक्तप्रकारेणात्मानमादायआत्माआत्मत्वेन
ज्ञात्वामनसासाधनेनमनसैवानुद्रष्टव्यमितिश्रुतेः ब्रह्मणाश्रीरामचंद्रेणसहएकी
कुर्यात एकंकुर्यादित्यर्थः एतदेवासकृद्भावनीयमुपासकेनेत्याह सदारामोहमि
[illegible]त्येततत्वतःप्रवदंतिये नतेसंसारिणोनूनंरामएवनसंशयइति सदाआसालोका
रंरामोहमित्येततत्वतइति तस्यभावस्तत्वंतस्मात्तत्वतः तत्वेन अयमर्थः प्रथमत
स्तुवैखरीमध्यमायांविलाप्यमध्यमांपश्यंत्यांपश्यंतींपरायामित्येकोयोगः सापरा राम
ॐकारेतंचोंकारंविभज्यअकारेउकारे उकारंमकारे मकारंअर्द्धमात्रायामितिद्वितीयः २७

ततश्चोंकारार्थद्वयमधिदैवाध्यात्मरूपं प्रथमतः क्रमेण अकारोकारमकारार्द्धमात्रा
स्तु लक्ष्मणशत्रुघ्नभरतरामाः वैश्वानरहिरण्यगर्भाव्याकृतेश्वराः अपरपर्यायाः। ततो वि
श्वतैजसप्राज्ञतुरीया इति द्वितीयो योगः स च ॐकारः सर्बं तत्र सर्बमात्मन्यारोपितं स च
आत्मा चतुष्पात् तस्य आत्मनो जाग्रदादि पादत्रयानुसाधनेनैकत्वमवधार्य चतुर्थपा
दः श्रीरामस्वरूपेणावतिष्ठते इति चतुर्थो योगः एवं योगचतुष्टयरूपं तत्त्वं तेनयेत तत्त्वतः प्रव
दृतिश्रवणमनननिदिध्यासनपरः प्रशब्दार्थः ते संसारे वर्त्तमाना अपि ब्रह्मप्रभुरूपवदन्येः
संसारिण इव परिदृश्यमाना अपि नूनं निश्चयेन तेन संसारिणः श्रीरामएवतेनात्र संशयः
संशयकर्त्तुर्नरकावाप्तिरेव फलेनान्यात् संशयात्मा विनश्यतीति स्मृतेः ननु यदि ते श्रीरा
मः तर्हि श्रीरामवत्सेतुबंधनाद्यद्भुतदेवदुष्करकर्मसामर्थ्यं किमिति तेषु न परिदृश्यते अतः

उ॰ता॰ संसारिणएवेत्युच्यतेश्रीरामभवैराजिमायायोगवैभवबलासाधारणसार्थ्यस्वाभावि
कंमायिनंतुमहेश्वरमितिश्रुतेः अविद्यावरणाविशिष्टजीवेत्वसामर्थ्यंस्वकीयंमाया
शाबल्यंपरित्यज्यजीवस्याचाविद्याशाबल्यंपरित्यज्यभक्तानुकंपयाभगवताशुद्धांशं
ब्रह्मात्मैकत्वंसमर्पितमतोमायाकार्याविद्याविद्याकार्यरहिताः शुद्धश्रीरामब्रह्मणि
एवजीवन्मुक्ताःसंसारिभिरनिर्द्धारितशीलाविचरंतीतिनेषदोषः तथाश्रीमद्भागवते
नकुर्यान्नवदेत्किंचिन्नध्यायेत्साध्वसाधुवा आत्मारामोनयावृत्त्याविचरेज्जडवन्मुनिरिति
ननुजीवन्मुक्तिर्नामदेहाभावोवासदेहस्यभोगाभावोवा नाद्यः विरोधात् नहिदेहवतो
देहाभावसंभवःनद्वितीयःभोगापरिहार्यत्वात् नहिभोगकारणेविद्यमानेभोगविच्छेदः राम
संभवति ननुभोगस्तुतात्त्विकोनात्त्विकोवानाद्यः अनिर्मोक्षप्रसंगात् नहितात्त्विकंस्तुक्मा २८

दृप्रमाणाज्ञाननिरस्यं द्वितीयमंगीकुर्महे भोगस्यात्माज्ञानपरिकल्पितस्यात्मज्ञानेन विच्छे
दसंभवात् तर्हिदं न समंजसं शिष्टोहार्दैर्वाधितस्याप्यनुवृत्तिदर्शनात् न हि काचकामलादि
कारणे विद्यमाने पीतशंखाद्यदर्शनमन्यथादेहवर्तनं न स्यात् अतो विदुषां जनकादीनां राज्यं
श्रूयते न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुत्यापि देहवतो भोगासंभवात् संभ
वो निरस्यते अतो युक्ता जीवन्मुक्तिरिति अत्रोच्यते तत्त्वज्ञानोत्पत्तिर्जीवतो मृतस्य वा नाद्यः
शमदमादिपूर्वकस्य श्रवणादिकारणानामसंभवात् अतस्त्वाद्योंगीकार्यः विदुषो याज्ञवल्क्य
स्य जीवत एव संन्यासः श्रूयते च मृतस्य जीवतस्तत्त्वज्ञानोत्पन्नो को लाभ इति चेत् ज्ञानादेव
त्वं कैवल्यमिति ब्रूमः स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति ब्रह्मविदाप्नोति परमित्यादिश्रुति
भ्यः तर्हि भोगसंततिदुर्निवारेति चेत् न भोगस्यात्माज्ञानपरिकल्पितत्वात् कारणानां विद्या

उ॰ता मानत्वेदिग्भ्रमोहादिवदनुवृत्तिर्दर्शितेतिचेत् दृश्यतांनाम नतथापितद्विरोधितस्यस्वप्राव्या
मोहवत्प्रमाणजनितज्ञानेनबाधितानुवृत्तिःकार्यक्षमत्वंलभते विदुषांजनकादीनांराज्यपा
वणांतुलोकसंग्रहार्थं ननुयदिविद्वांसमपिहिफलबाधनात्मकलकर्मसंन्यासेनैवानुष्ठ
ह्यतां नत्वग्निहोत्रादिनेतिचेत् न स्वयमाहेतपाणिनिर्गणेचोद्यमनुसरति यस्ययादृक्प्रारब्ध
कर्मसंस्कारस्तस्यतादृगेववर्तनं उत्पन्नेपिज्ञानेतेषामनर्थैवनाल्पालोकसंग्रहेहिक्रियमाणे
नैषदोषः नहवैसशरीरस्यपतिश्रुतेःकागतिरितिचेत् तस्याःसामान्यविषयत्वेनविदुषप
द्विशेषाश्रवणेनचास्वलितगतिरेवश्रुतेर्जीवनेनवमुक्तस्यबाधितानुवृत्तिर्भवतीतिमुक्ता
जीवन्मुक्तिः ननुनेतिनेतिनेत्यतस्मादितिनह्यन्यत्परमस्तिनेहनानास्तिकिंचनेत्यादिवाक्य राम
सहिततत्त्वमसिमहावाक्यात्पन्नज्ञानेनप्रपंचविलयद्वाराज्ञाननिवृत्तौप्रपंचप्रत्ययेनबाध्यतायां २९

देहस्यापिप्रपंचांतःपातित्वात् ज्ञानोदयसमनंतरमेवशरीरविलयःप्राप्नुयात् सिद्धाजीवन्मु
क्तिरितिचेत् न प्रारब्धकर्मवशात्तदनुवृत्तेः ज्ञानोदयेनसकलकर्मक्षयेपिप्रारब्धकर्मसंस्का
रवशात्कुलालचक्रभ्रमणवच्छरीरभ्रमणमितिजीवन्मुक्तिः सिद्धैव अतोजीवन्मुक्तास्ते
विचरंति तथाचजाबालोपनिषच्छ्रुतिः तत्रपरमहंसोनामसंवर्त्तकारुणिःश्वेतकेतुर्दुर्वास
ऋभुनिदाघजडभरतदत्तात्रेयरैवतकप्रभृतयोव्यक्तलिंगाव्यक्ताचाराअनुन्मत्ताउन्मत्त
वदाचरंतस्त्रिदंडंकमंडलुंशिक्यंपात्रंजलपवित्रंशिखांयज्ञोपवितंचेत्येतत्सर्वंभूःस्वाहेत्यप्सु
परित्यज्यात्मानन्विच्छेद्यथाजातरूपधरोनिर्द्वंद्वोनिष्परिग्रहस्तत्वब्रह्ममार्गेसम्यक्संपन्नः
शुद्धमानसःप्राणसंधारणार्थंयथोक्तकालेविमुक्तोभैक्षमाचरन्नुदरपात्रेणलाभालाभौसमौभू
त्वाशून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुह

ता०उ रकंदरकोटरनिर्झरस्थंडिलेष्वनिकेतवासाप्रयत्नो निर्ममः शुक्लध्यानपरायणोऽध्यात्म
निष्ठोऽशुभकर्मनिर्मूलनपरः संन्यासेन देहत्यागं करोति स परमहंसो नामेति यद्बालल
णालक्षिताः श्रुताः स्वकर्मसंस्कारसदृशाः स्वच्छंदा विचरंति तस्माद्ब्राह्मणः पांडित्यं निर्वि
द्य बाल्येन तिष्ठासेद्बाल्यं च पांडित्यं च निर्विद्याथ मुनिरमौनं च निर्विद्याथ ब्राह्मणः स ब्राह्म
णः केन स्याद्येन स्यात्तेनेदृश एवातोऽन्यदार्त्तमिति श्रुत्युक्तावाविचरंति उपसंहरतीद
मुपनिषद्य एवं वेद समुक्तो भवतीति याज्ञवल्क्य इति एवं विद्यां उपनिषत ब्रह्मविद्या
यः श्रीरामोपासकः एवमुक्तप्रकारेणावेद जानाति समुक्तो भवति त्रैलोक्यपूज्यो भव
ति समुक्तो भवतीति वा पाठः इति याज्ञवल्क्यः एवं भरद्वाजमुपदेशितवान्याज्ञवल्क्य इति राम
३ प्रथमकंडिकायां बृहस्पतिप्रश्नोत्तरे यत्तारकं ब्रह्म निर्दिष्टं द्वितीयायां भरद्वाजप्रश्नो ३०

नरेतारत्तारकेकैयेनतत्स्वरूपंदर्शितं द्वितीयायांतस्यार्थमुक्तानेनवाच्येनवाचकेकंनिरू
पितं तस्यब्रह्मात्मैक्यस्यश्रीरामचंद्रतत्वस्यप्राप्तिः कथंभवतीतितदुक्तंचतुर्थ्यामारभ्यते तत्र
भरद्वाजाद्यब्रह्मविद्यायांसर्वशास्त्रार्थभूतायांसमापितायामप्येतत्स्वकेयनात्रिः पृच्छति अ
थहैनमत्रिःपप्रच्छयाज्ञवल्क्यंयएषोऽनंतोऽव्यक्तआत्मातंकथमहंविजानीयामितिप्रश्नार्थः
यस्मिन्यास्समनंतरकंडिकायांवत्त्वप्राहात्मोक्तः तमात्मानमनंतत्वादव्यक्तत्वात्कथमहंवि
जानीयामितिप्रश्नार्थंउत्तरमाहसहोवाचयाज्ञवल्क्यःसोविमुक्तउपास्यइति आत्मनानु
विमुक्तमविमुक्तेसंधिंतुरीयमितियावत् तस्मिन्नुपास्यः प्रत्यगात्मनयाउपासनीयः सर्वे
त्रावस्थितत्वादविमुक्तएवोपास्यइतिकोयंनियमइत्यतआह यएषोऽनंतोऽव्यक्तआत्मासो
विमुक्तेप्रतिष्ठितइति यइत्याद्यन्वयसोविमुक्तेप्रतिष्ठितइत्यनेनतस्यव्यापकस्यापितेजसोर्क

उत्ता॰ मंडलवदविमुक्तसंधौ प्रतिष्ठावस्थानं युक्तमिति भावः अनेनोपासनासौलभ्यं दर्शितं सो
३१ विमुक्तशब्दवाच्यः संधिरेव कथं ज्ञातव्य इति पृच्छति सोविमुक्तः कस्मिन्प्रतिष्ठितो भवतीति
स्पष्ट उत्तरमाह वरणायां नास्यां च मध्ये प्रतिष्ठित इतीति स्पष्टं पुनः पृच्छति कावैव
रणा का च नाशीतीति स्पष्टं उत्तरमाह सर्वानिंद्रियकृतान्दोषान्वारयतीति तेन वरणा
भवतीति सर्वानिंद्रियकृतान्पापान्नाशयतीति तेन नासी भवतीति संप्रकृधीयते निधीयते
सृष्टिप्रलयादि सर्वमस्मिंनिति संधिः उभयत्राहित्पर्षिवर्णविपर्ययश्छांदसः स्पष्टं पुनः
पृच्छति कतमं चास्य स्थानं भवतीति अस्याविमुक्तस्य संधेरित्यर्थः उत्तरमाह भ्रुवोर्घ्राण
स्य च यः संधिः स एष द्यौर्लोकस्य परस्य च संधिर्भवतीति भ्रुवोर्घ्राणस्य च यः संधिः अष्टोस्य राम
देहे द्यौर्लोकस्य परस्य च यः संधिः स मष्टोकाशयभिधे अविमुक्ते स एष त्वया पृष्टः संधिर्भवतीत्य ३१

न्वयः एतद्देवोपासनाख्यानमिति सदाचारेणाऽऽदर्शयति एतद्वै संधिं संध्यां ब्रह्मविद उपा
सत इतीति एनं प्रसिद्धं संधिं नपुंसकत्वमार्षं संध्या संध्योपास्ति न ब्रह्मविदः पूर्वोक्ताः
ब्रह्मात्मैकत्वज्ञाः उपासते उपासनां कुर्वंतीति निरूढं का ध्यानसंध्या वाक्कायक्लेशव
र्जिताः संधिनी सर्वभूतानां सा संध्या ह्येकं डिंडिनामिति स्मृतेः उपसंहरति सो विमुक्त
उपास्य इतीति यस्मया पृष्ट आत्मा ब्रह्मात्मैकं कथमहं विजानीयामिति स आत्मात्र
विमुक्तेश्च वोऽर्धाणस्य संधौ उपास्यः सर्वदोपासनीयः दृताभ्रूमध्यगोचरः भ्रूमध्ये सं
स्थितं देवमित्यादिस्मृतिभ्यः तथा च वशिष्ठः निद्रादौ जागरस्यांते यो भाव उपपद्यते
तं भावं भावयन्नास्व जीवन्मुक्तः सदा भव यदिदं दृश्यं पृथक्कृत्स्नं त्वचितिर्विश्वम्प्रतिष्ठसि अथ
नेव स्वसीशांतो जीवन्मुक्तो भविष्यसीति गोविंदभगवत्पूज्यपादाचार्यैरपि गोविंदम

उ॰गी
३२

गवद्व्यैतिरूपितं श्रृणुतमध्यगातयत्त्रिषिविद्वत्स्वर्यवज्ज्ञागज्ञासि केषांचित्पु
ण्यवशादुन्मीलयति चिन्मयं ज्योतिः १ परमानंदैकरसं ज्योतिः परमस्वभावमविक
ल्पविगलितसर्वक्लेशं ज्ञेयं शांतस्वसंवेद्यं २ तस्मिन्नाधायमनस्फुरदखिलं चिन्मयं
जगत्पश्यन् उत्पन्नकर्मबंधोब्रह्मत्वमिहैवचाप्नोति ३ असंहियांतिविषयाः प्राणा
स्पंतः प्रशाम्यंति नस्फुरतीतेङ्गः स्वस्वरेव चिद्बोधविध्वस्तमोहानां ४ रागद्वेषविमुक्ताः
सत्ययाश्वाहंतयारहिताः सर्वत्रनिर्विशंकाभवंति विद्वत्स्वसंस्पर्शात ५ तिष्ठंत्यपि
मादियुक्तादेहे स्मीनलब्धसच्चिदानंदाः ब्रह्मस्वभावममृतं संप्राप्तान्यैवकृतकृत्याः ६
आयतनंविद्यानांमूलंधर्मार्थकाममोक्षाणां श्रेयः परंहि किमन्यच्छरीरजरामरंविहा
येकामितिसरेश्वरवार्तिकेचतथा श्र [illegible] पारगरतेवाच्यविरुधफलदोभव राम ३२

प्रत्यग्दृशां विमोहापसंसारापपराग्दृशामिएतद्देवाविमुक्तेष सिद्धियोजनीयं यत्तदा
नादिभिर्बहुजन्मसु संपादितसुकृतसंस्कारचितश्चरम[illegible]रीरस्य शमदमादिसाधन
चतुष्टयसंपन्नस्य पूर्वतापनीयोक्तसगुणोपासनप्रसादलब्धचित्तस्थैर्यस्य श्रवणम
मनननिदिध्यासनजनितसाक्षात्कारानुभववैभवविलासं निरावरणं कैवल्याख्यं निव
दाकांक्षमाणस्य सकलकर्मसन्यासपूर्वकदेहाभिमानगलितस्य यत्रकुत्रचिद्धनेमा
नस्य अक्रोधेणस्य संधावतिमुक्तोपासनं निर्गुणश्रीरामोपासनाभिधेयमेवमुचि
तं नान्यदिति सर्वशास्त्रार्थपरिसमाप्तावेवंभूतः श्रीरामोपासक एव त्रैलोक्यगुरुर्भव
तीति उपासनाफलमाह सोविमुक्तं ज्ञानमाचष्टे यो वै तद्देवं वेदेति उपासकः वै निश्च
ये एतत्तउपासनं एवमुक्तप्रकारेणावेदजानाति सोविमुक्तं तुरीयाख्यं संधिं ज्ञानं श्राव

उ॰ता ष्टं कथयति तदुक्तं गीतासु उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इति शिष्टार्हस्य शि
३२ ष्यस्यातिरहस्यत्वात्तद्ग्रहणमेव संक्रामणेन बोधमुत्पादयतीत्यर्थः सर्वत्रेति शब्दाः ब्रह्म
समासेऽन्नरसमासेऽपि च ज्ञातव्याः शिष्यस्य [illegible]
संमुखीकरणाय व्याख्यापिकामाह अथ तत्र तपनाचेति त्वरीयसंबोधोऽस्मायामपित्र
ज्ञानिनां रहितस्यैव धिरार्पितगृह्यमि प्रभवति अथ तदनन्तरं तं अत्रिं प्रति उवाच स्वय
मेव याज्ञवल्क्य किमुवाच तत्राह श्रीरामचन्द्रस्य मन्त्रं काश्यां जजाप वृषभध्वजः मन्व
न्तरसहस्रैस्तु जपहोमार्चनादिभिः ततः प्रसन्नो भगवान् श्रीरामः प्राह शंकरं वृणी
ष्व यदभीष्टं तद्दास्यामि परमेश्वरेति स होवाच मणिकर्णिकायां मत्क्षेत्रे गंगायां वा तटे पुनः ध्रि राम
यन्ते देहिनस्तज्जन्तोर्मुक्तिर्नान्तो वरान्तरमिति अथ स होवाच श्रीरामः क्षेत्रेऽत्र तव देवेश यत्र ३२

कुत्रापि वा मृताः। कृमिकीटादयोप्याशु मुक्ताः संत्युन चान्यथा। अविमुक्ते तव क्षेत्रे सर्वेषां मु
मुक्तिसिद्धये। अहं संनिहितस्तत्र पाषाणप्रतिमादिषु। क्षेत्रेस्मिन्योर्चयेद्भक्त्या मंत्रेणाने
न मां शिव ब्रह्महत्यादिपापेभ्यो मोक्षयिष्यामि मा शुचः। त्वत्तो वा ब्रह्मणो वापि ये लभंते
षडक्षरं जीवंतो मंत्रसिद्धाः स्युर्मुक्ता मां प्राप्नुवंतीति। मुमूर्षोर्दक्षिणे कर्णे यस्य कस्यापि वा
स्वयं। उपदेक्ष्यसि मन्मंत्रं स मुक्तो भविता शिवेतीति। त्वत्तो वा ब्रह्मणो वापीत्यनेन शिवा
व्रसोदि४ दिसंप्रदायप्रदर्शितं। अन्यत्स्पष्टं ज्ञानस्यालभ्यादविमुक्तमेव कस्यापवर्गांतरफलं तदाह
श्रीरामचंद्रेणोक्तं। यो विमुक्तं पश्यति स जन्मांतरितान्दोषान्नाशयतीति। जन्मांतरितश्च
स्वकर्मव्यतिरेकेणेह जन्मकृतकर्मोपलक्षणार्थं। शेषं स्पष्टं। अविमुक्तोपासनया ना
यासतः श्रीरामसाक्षात्कारो यस्मात्तस्मादविमुक्तत्यागे पुरुषपरमार्थहानिः स्यादिति तात्पर्यः। त

याचब्रह्मांडे मोक्षं सुदुर्लभं ज्ञात्वा संसारे सातिभीषणे ॥ अविमुक्ते समासाद्य तत्रैव निध
नं व्रजेत इति ॥ अधिभूतं साधिदैवमध्यात्मम विमुक्तं ॥ आत्माकाशीभ्रुवोर्मध्ये सो लभ्यं
तन्नरोत्तरं समष्टिव्यष्टिगं पूर्वं समष्टं वैचचोत्तरं ॥ व्याष्टं वैवत्तृतीयस्मात्त्रिसुचैकं न सत्त्व
ग इति संग्रहः ॥ ततः प्रसन्नो भगवान् श्रीरामः प्राह शंकरमिति पूर्वोक्तं आलोकेन प्रकारेण
वा॰५ भगवन् त्वमसीदनीतितं प्रष्टुं पंचममंकं उकारंभ८ श्रीरामप्रसन्नकरणोपायं पृच्छति ईश्वरात्
गृहीतस्य ज्ञयविद्यासंभवात् तदुक्तं ईश्वराद्गुरुमहादेवपुंसामद्वैतवासनामहाभयपरित्रा
णाय उपजायते इति ॥ अथ हैनं भरद्वाजो याज्ञवल्क्यमुवाचाथ केर्मंत्रैः स्तुतः श्रीरामः प्रीतो
भवति स्वात्मानं दर्शयति तं नो ब्रूहि भगवन्निति स होवाच याज्ञवल्क्यः ॥ श्रीरामेणैवं शि
क्षितो ब्रह्मा पुनरेतया गाथया नमस्करोति विश्वाधारं महाविष्णुं नारायणमनामयं

पूर्णानंदैकविग्रहं परंज्योतिःस्वरूपिणं मनसासंस्मरन्ब्रह्मा तुष्टाव परमेश्वरं ॐ यो
वै श्रीरामचंद्रः स भगवानद्वैतपरमानंदात्मा यः परब्रह्म भूर्भुवः स्व तस्मै वै नमो नमः
१ यथा प्रथममंत्रोक्तावाद्यंतौ तथा सर्ववेदेतात्मा भूः ५ ये सर्वे वेदाः सांगाः सशाखाः स
पुराणा भूः ६ यो जीवात्मा ७ यः सर्वभूतांतरात्मा भूः ८ यो देवासुरमनुष्यादिभावात्मा
: ९ ये मत्स्यकूर्माद्यवताराः १० यश्च प्राणो भूः ११ योंतःकरणचतुष्टयात्मा भूः १२ यश्च
यमो भूः १३ यश्चांतको भूः १४ यश्च मृत्यु १५ यश्चामृतं भूः १६ यानि पंच महाभूतानि भूः
१७ यत्स्थावरजंगमात्मा कं भूः १८ ये पंचाग्नयः भूः १९ याः सप्तव्याहृतयः २० या विद्या
२१ या सरस्वती २२ या लक्ष्मीः २३ या गौरी २४ या जानकी २५ यच्च त्रैलोक्यं २६ यश्च सूर्यः
सर्वमंत्र श्रुज्ञात यो यश्चाखंडैकरसात्मा भूः २ यश्च ब्रह्मानंदामृतं भूः ३ यस्तारकं ब्रह्म भूः ४ यो ब्रह्मा विष्णु नृसिंह ३

रा॰उ॰ २७ यश्चसोमो २८ यानिनक्षत्राणि २९ येचनवग्रहाः ३० येचाष्टौलोकपालाः ३१ येचा
३५ ष्टौवसवो ३२ येचैकादशरुद्राः ३३ येचद्वादशादित्याः ३४ यच्चभूतंभव्यंभविष्यं ३५ यो
ब्रह्मांडस्यांतर्बहिः व्याप्नोतियोविराट् ३६ योहिरण्यगर्भः ३७ याप्रकृतिः ३८ यश्चौंकारः
३९ याश्चतस्रोऽर्द्धमात्राः ४० यःपरमपुरुषः ४१ यश्चमहेश्वरः ४२ यश्चमहादेवः ४३
यॐनमोभगवतेवासुदेवाययोमहाविष्णुः ४४ यःपरमात्मा ४५ योविज्ञानात्मा ४६
ॐयोवैश्रीरामचंद्रःसभगवान्यःसच्चिदानंदाद्वैतैकरसात्माभूर्भुवःस्वःतस्मैवैनमोनमः त४
४७ इत्येतैर्ब्रह्मासप्तचत्वारिंशन्मंत्रैर्नित्यंदेवंस्तौतितस्यमहादेवःप्रीतोभवतिस्वात्मानं
दर्शयतितस्माद्यएतैर्मंत्रैर्नित्यंदेवंस्तौतिसदेवंपश्यतिसोऽमृतत्वंचगच्छतीति एतेमंत्राः राम
श्रीनृसिंहपूर्वतापनीयेद्वात्रिंशद्ब्रुहितयावेणशिरसिरुद्रोपनिषदि अत्रापिचनाना ३५

पावकमादृष्टाःश्रीरामचंद्रानुग्रह वह्निविकुष्यापरिशोधिताः पाठक्रमभंगभयाच्चिवि
ताविज्ञेयाः एभिक्तसर्वात्मकत्वंश्रीरामचंद्रस्योच्यते तस्येति तस्यवलक्षणाः सर्वेवपश्य
तीति एवंश्रीरामसाक्षात्कारात्मनिरूपयाबहिरपिचपश्यतिः अमृतत्वमिति मोक्षंगच्छति
प्राप्नोतिग्रेयममाप्तिंदर्शयति इत्यथर्वणरहस्येश्रीरामो त्तरतापनीयोपनिषत्समाप्ते
ति संमंत्रामलतारकेरणमंत्रनाहिरन्यधटूष्ठाहेयत्तहद्वीपेंद्रमहेंद्रचंद्रमरतैर्गोप्यविरिं
च्यादिभिः १ व्यक्तानंदवनोद्धताश्चपरमानंदेनयासंभृतातामानंदनिधिंनिधायत्हृदये
नंदंद्वरामप्रियाः यस्याभक्तिः विभक्तिर्विविधशमदमप्राप्तिरप्राप्तिरस्तुः खस्येतानिरत्ना
न्यखिलसत्कृतिनांयांतिलाभायभूमौ विद्यांमोधिप्रवृद्धप्रवरतरमहावेधचंद्रोदयाः थ्या२
मनराद्यानिधितानिदधतत्हृदयेत द्विरःसर्वकाले विश्वेशपादपद्मोयमकरंदौघविंदुभिः

ना०उ ३६ रंजितायांसरहाकाश्यांटीकानंदवनेः कृता यस्योपदेशाद्धन्यानारकंब्रह्मकाशते का
श्यांकाशीनिवासायनमस्तस्मैपिनाकिने ४ इतिश्रीरामचंद्रचरणानुगृहीतपरमहं
सपरिव्राजकाचार्यानंदवनविरचिताश्रीरामोत्तरतापिन्युपनिषद्दानंदनिधिटीका
समाप्ता॥ ॥ ॥ तत्सद्ब्रह्मार्पणमस्तु रामश्रीरामजीवदशोविशुद्धाचिद्विभागश्रुतपो
ईयोः अविद्यातत्त्विनोयोगः घउस्माकमनारत १ संवत १७१९ [redacted]

३६